॥ श्रीकेशवाय नमः ॥

अथ गोविंदकविकृत

पुष्पसेनतनयराज्याधिरोहणं

CHECKED 1975
Initial

नाटक ।

प्रती—१०००

मुद्रक—शं. न. जोशी, ८१८ सदाशिव पेठ, 'चित्रशाळा' प्रेस, पुणे शहर.

प्रकाशक—रा. रा. देवराव महादेवराव वकील. मु. लातूर, जि. उस्मानाबाद व रा. गोविंदाचार्य गुराचार्य नागू-हठीकर मु. बरदापूर; जि. बीड.

शक प्रमाणीकरण १९८४-१९८५

मूल्यमेकरूप्यकम ।


॥ श्रीकेशवाय नमः ॥

अथ गोविंदकविकृत

पुष्पसेनतनयराज्याधिरोहणं

नाम

नाटकं ।



स्वेन रचितं नाटकग्रंथमिमं

स्वयमेव दृष्टिपूतं कृत्वा

रा. रा. शंकरेण नरहरिपुत्रेण

जोशीत्युपपदधारकेण पुण्यपत्तन

स्वीयचित्रशालाख्यमुद्रणालये

वसुभूवसुमितगृहनंबरे

मुद्रितम् ।

स्वाधीनानि कृतानि ।

मुन्यग्निवसुभूसंमितशालिवाहने शाके मार्गशीर्षे
शुक्लपक्षे द्वितीयायां बुधवासरे पुस्तकमिदं
साकल्येन मुद्रितमासीत् ।

मूल्यमेकरूप्यकम् ।

एतन्नाटकं सन १८६७ इत्यस्य २५ तमनियमानुसारेण
अस्माभिः स्वायत्तीकृतम् ।

॥ श्री ॥ वेंकटेशप्रसाद ॥



इदानीमस्मिन् भरते वर्षे गीर्वाणभाषासरस्वतीसदनांतः प्रवेशमात्रविरक्तबुद्धीनां श्रीमद्धरिपदारविंदमकरंदास्वादनब्रह्मचर्याणां रवितनयराजधानीगतनानायातनाभोगनिर्वर्धानां जना नामीदृशीं दशामवलोक्यपरमकृपालुस्तेषामल्पश्रमसाध्यं विदितेठाबाईस्वमातृतुल्यसकलपरललनो हरिपादपद्मयुग्मलुब्धोगोविंदनामा वृत्तरत्नाकरोक्तसर्ववृत्तबद्धश्लोकं कंचित्पुष्पसेनतनयराज्याधिरोहणनाटकग्रंथतत्त्वज्ञानप्राप्त्यर्थहरौ भक्त्युत्पादनार्थं वा व्यरचत् । ननुविदितसकलपरललनः कथं स इत्युक्ते तेनैव स्वकृते ग्रंथांतरे सर्वजगदिदं पतिव्रतामयमिति मनसि ज्ञात्वा प्रोक्तोऽयं श्लोकः ॥ यस्मिंस्थिते हरिकथाश्रवणेन किंच पत्युर्व्रतेन तपसा महिलाजनस्य ॥ दानेन किं पतिरतव्रतयुक्तकाभ्यस्त्रीभ्यो नमोऽस्तु मम सादरमेव नित्यं ॥ १ ॥

गोत्रावतंसस्यवशस्तनूजा गोविंदसूरेर्जलधान्यपन्ना ॥ अत्रेरिवेक्षितुमस्यकांतिं रराज तुच्छीकृतचंद्रकांतिः ॥ २ ॥ स्वसूनुसंदेहकरैर्विगूढाक्षीरोदधिंचाप्युदधीनुजिगाय ॥ जेतुंस्वभासेंद्रगजं जगाम जित्वा पुनर्विष्णुपुरं ययौसा ॥ ३ ॥ तत्पादलग्नंजनकस्यचित्तं विलोक्य हृष्टा स्वयमप्यभूच्च ॥ कटाक्षजातापि तदीयपादपद्मामृतास्वादनसक्तचित्ता ॥ ४ ॥ तदलंवृथाप्रजल्पनेन । स एव विदुषोविज्ञापयति । स्वेनैव संशोधितेष्वस्मिन्ग्रंथे मुद्रणकारहस्तदोषाअस्मादृष्टिदोषाःस्थिताश्चेत्तान्स्पष्टीकृत्वाऽनसूयवस्तस्मै निवेदयंतुविद्वांसः । इत्यलं । कविनैवकृता प्रस्तावना समाप्ता ॥



॥ श्रीगणेशाय नमः ॥

अथ प्रथमोंकः ।

निर्विघ्नमस्तु ॥ अथ पुष्पसेनतनयराज्याधिरोहणनाटकप्रारंभः॥

भूमिः शून्यतमा यदा शठमतिर्दर्पांधभूतस्तदा
भर्त्रा शास्त्रनिषिद्धकर्मनिरतस्तं नारसिंहो रिपुं ॥
यो यस्तद्वधकुद्धयोत्थुमनसस्त त्सूनुपीडासहो
हत्वा भूमिमपालय त्सविनयंत्वांशः सुतान् पातु सः ॥ १ ॥

नान्द्यन्ते

सूत्रधारः—अलमनेन परिषज्जनकुतुकविमर्दकारिणा श्रमेण। एवमहमार्यमिश्रान् प्रणिपत्य विज्ञापयामि यदिदं वयं पुष्पसेनतनयराज्याधिरोहणं नाम प्रकरणंआश्रित्यैनमारधयामः । एतत्कविः किल ॥

प्रज्ञाग्रस्थितशास्त्रिणस्त्वधिगता विद्या तथा वैष्णवी
निष्ठा यस्य दयावशात्स्थिरतरा भक्तिर्मुदे केशवे ।
बुध्या केशवपादपद्मयुगले स्तोत्राख्यपुष्पांजलि-
र्न्यस्तोऽयं ग्रथितं भुयारवसता गोविंदनाम्ना त्विदं ॥ २ ॥
लिखितापि बालभाषा व्यर्थामत्वात्र नोच्यते लोकैः ॥
गुरुसुतगोविंदेन रचितं तच्छून्यनाटकं रम्यं ॥ ३ ॥

(नेपथ्याभिमुखमवलोक्य।) आर्ये इत एहि ।

नटी—(प्रविश्य) आर्यपुत्र इयमस्मि आज्ञापयत्वार्यपुत्रः ।

सूत्रधारः—किमन्यदस्याः परिषदः श्रवणविषयभूतस्य संगीतस्य स्वरात् ।

नटी—कंसमयमाश्रित्य गीयतां ।

सूत्रधारः—नन्वमुमेन प्रचंडदिनकरकिरणप्रवेशमात्रेण कोमलानां महादेवकंठ इव तत्कंठासक्तया पार्वतीबाहुविद्युलतया विराजमानो विद्युलताभिर्विराजमानानां मेघानां चातकानंदकरिणा वृष्टिपातेन ब्रह्मक्षत्रवैश्यशूद्रवर्णसमद्भूता यन्नारायणानुग्रहात् यावत्धरिपदारविंदं शूद्रोऽपि न संगच्छति तावदेवस्पर्शापर्शभावः कल्प्यते अन्यथा तमेव पूज्यतमं यदनुग्रहः कुरुते तथा कुर्वतं

वर्षऋतुसमयमाश्रित्य गीयतां संगीतकं । कांतेऽत्राचेतना अपि जीवा इव भांति यतः पश्य ।

नद्याः प्रवाहाः स्वकरैर्गृहीत्वा सुगंधि वस्तु ह्यसुगंधि वस्तु ॥
पुनंति मे शस्यमहीरुहेभ्यः पुष्पाणि पादे च समर्पयंति ॥ ४ ॥

नटी—तथेति गायति ।

सामंतचक्रेण सुयाचितोऽसौ सिंहासनस्थो मनसा कृतार्चिः ॥
उपायनान्येव पुरो निधाय विनामरेसेनहि पुष्पसेनः ॥ ५ ॥

(नेपथ्ये सरोषं ।) रेरे अमात्यपुरःसराः स्वबाहुपराक्रमावलेपतिरस्कृतराजबलिकर्माणं तावदुन्मत्तममरेश्वरमेव जेष्यामः ।

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य ।) आर्ये कुत एतत् ।

नटी—अहं न जाने कुत इदं भवतीति ।

सूत्रधारः—भवतु शब्दानुसारेणावलोकयामि । (नेपथ्ये पुनस्तदेव पठति ।)

सूत्रधारः—(ससंभ्रमं सदृष्टिक्षेपं ।) प्रिये एष खलु महाराजः बाहुबलावलेपासमर्पितराजबलिकर्महेतोः क्रुधः पुष्पसेन इत एवागच्छति । तदित आवामन्यत्र गच्छाव इति निष्क्रान्तौ ।

प्रस्तावना । ततः प्रविशति सामात्यपुरःसरः सिंहासनस्थो राजा ॥

राजा—रेरे अमात्यपुरःसरा इति तदेव पठति ।

सचिवः—मर्षयतु मर्षयतु महाराजः ।

राजा—किं स जेतव्योऽथवोपेक्षितव्यः ।

सचिवः—जेतव्य एवसोऽपि वीरः अन्यैर्नृपैः सहायवान् । पश्य ।

कालिंगराजः सुबलः सोमदत्तस्तथाऽपरे ॥
नीलसेनश्च तस्यैव स्वाधीनान्भूप विद्धि तान् ॥ ६ ॥

राजा—अतो जेतुमशक्य इति उपेक्षितव्यः ।

सचिवः—नहि नहि । जेतव्य एव । तथाहि ।

उपेक्षिताश्चेद्रोगाश्च धीरसत्त्वैरवज्ञया ॥
रिपवस्तइवातोऽरीन् वर्धते नैव तान् त्यजेत् ॥ ७ ॥

राजा—तर्हि तमेव जेतुं गच्छामः । कः कोऽत्र भोः ।

प्रविश्य दौवारिकः ।

दौवारिकः—जयतु जयतु महाराजः । उपसृत्य । आज्ञापयतु भर्ता ।

राजा—एवं विज्ञापय सारथिं । मत्तगजतुरंगपदातिनरनृपसहस्रसमेतं सबाणासनं सेनापतिनाधिष्ठितं ससैन्यं सांग्रामिकं मे रथमुपकल्पयेति । तथा कंचुकिनं प्रवेशय ।

दौवारिकः—तथेति निष्क्रांतः । (ततः प्रविशति कंचुकी)

कंचुकी—(उपसृत्य) । जयतु जयतु महाराजः ।

राजा—(कंचुकिनं वीक्ष्य) प्रेक्ष्यंतां प्रमदवनभूमयः ।

कंचुकी—(तथेति) निष्क्रांतः ।

ततः प्रविशति सूतः ।

सूतः—राजन् स्वस्ति भवते । सेनापतिस्तुमदकरितुरंगपदातिनरनृपशतसहस्रसंकुलितसैन्येन युक्तो भवदागमनमेव प्रतीक्षते । तथाहि—

सज्जो रथस्ते विजयाभिधेयः संग्रामिको बाणधनुः समेतः ॥
मुहुर्मुहुः शद्धितहेमघंट । स्तं जेतुमायांतु बलाद्भवंतः ॥ ८ ॥

राजा—तेन हि गच्छाम तं जेतुं । इति निष्क्रांतः ।

ततः प्रविशति देवी चेटी च ।

देवी—सबाष्पं निस्वसति ।

चेटी—समास्वसितु समास्वसितु देवी ।

देवी—कुत इदानीं समास्वासः । मेऽत्यंतं हृदयं दह्यति ।

चेटी—एवं महाराजस्य पत्नी भूत्वा विनष्टधैर्याऽतिमात्रं संतप्यसे । कथय किमर्थं ते हृदयं दह्यति ।

देवी—अवहिता तावद्भव । यद्येवं कथयिष्ये ।

चेटी—अवहिताऽस्मि कथयतु प्रियसखी ।

देवी—अद्य समे भर्ता वीरममरेश्वरं जित्वा जीवन् प्रतिनिवृत्तो भवतीति नवेति संशयः ।

चेटी—(आत्मगतं) ममापि सैव शंका भासते भवतु तावदेनामाश्वासयामि । (प्रकाशं) शांतं पापं प्रतिहतममंगलं । सत्यं तं जेष्यति महाराजः ।

देवी—कथं ।

चेटी—बाणवृष्ट्या तद्रथं तत्सूतं तमपि जित्वाऽगच्छति राजा ।

देवी—तस्यकृतेऽत्यंतं शोचति मे मनः । यतः प्रियपुत्रकोऽस्मासु न जनितः वधूशते एकायामपीति । अथवा महाराजाय या रोचते तामेवोपमंत्र्य तस्यां तनयो जतोऽपि न रोचतेऽस्मभ्यमिति न सोऽपि रोचतैवा । तथापि एतद्वचनमेव बाधते । पश्य ।

मद्धस्तदत्तं न गृहीतमेतैर्भिक्षार्थमायातजनैर्न वाचः ॥
तिरस्कृतं चातिकठोरया यद्वंध्याजनैर्दत्तामिदं न वाचा ॥ ९ ॥

(नेपथ्ये कलकलः)

देवी—(ससंभ्रमं) हला कुतोऽयं निश्वनः ।

चेटी—(नेपथ्यभिमुखमवलोक्य) अहो अखंड प्रवर्तितबाणवृष्टिपातेन अमरसेनस्य ससैन्यो रथवरः प्रच्छादितः अतः भयंकरखोऽत्थितः ।

नेपथ्ये कलकलानंतरं ।)

भोभो अमरेश्वरादिभूपाः प्रमत्तबाहुदंडसमरोद्यगाः किमद्यापि स्थीयते भवद्भिः । तथाहि ।

शार्दूलस्त्वं वनचरमृगाः सर्वराजानरास्ते
क्रुद्धे सिंहे विशति गहनं युत्थरूपं नरेश ॥
उन्मत्ताद्भूतिमिरसमरास्सिंहतुंडे पतंतः
शूरो विद्धि त्वमपि पतसि पुष्पसेनाख्यवन्हौ ॥ १० ॥

चेटी—एष महाराजः सर्वं रिपुकुलं दग्ध्वा तममरेश्वरमपि दग्ध्वाऽऽगच्छति।

देवी—किं मे नाथो रिपुकुलं दग्ध्वाऽऽगच्छति ।

चेटी—अथ किं । (पुनर्नेपथ्ये ।)

भो पुष्पसेनप्रभृतयः शृणुध्वं सर्वे ।

मद्बाणमोहितमिमं सचिवं प्रसह्य । पुष्पावतीनगरवासिजनेश भूप ॥
संपातितं भुवि मया नगरं प्रविश्य। उत्थापयन्जनप पाहि भुवं मुदा तं ११

चेटी—अनया वार्तया पर्याकुले स्वः (पुनर्नेपथ्ये ।) भो राजाधिराज पुष्पसेन शरणागतरक्षक शरणागतं मां पाहीति याचे । तथाहि ।

दुष्टानां गर्ववन्हिः शरणगतजनान्पालकः सिंधुपुत्र्या—
स्साक्षाद्वैरी त्वयापि पतिरिव समरे खिन्नतुंडो हि भूत्वा ॥
मां क्षोणेरीश पाहि इति शरणगतस्तं त्यज दीनबंधो

दारिद्र्यं दह्यतेऽतो द्विजकुलदहनं त्वामहंरक्ष मां हि ॥ १२ ॥

अपि च ।

तव गुणमहिमानं वीक्ष्य जानन्नरः क
स्समरनिरतकर्मा स्यादतो वीरमुख्य ॥
कृतनतशिरसं मा मंतुमंतं सुपाहि ।
वदसि तव निदेशो यन्मया धार्यते सः ॥ १३ ॥

चेटी—(नेपथ्याभिमुखं वीक्ष्य) देवि महाराजः शरणगतममरेश्वरं रक्षन् तं हस्ते गृण्हन् तेन सह किमपि भाषमाणसान्नित एवागच्छति इनादीमावां गच्छावः । (इति निष्क्रांते) ततः प्रविशति सभार्येणामरेश्वरेण समं सामात्य-पुरःसरो राजा ।

राजा—दुष्ट बुद्धे शरणागतममरेश्वरं मोचयाम अथवा मारयाम ।

दुष्टबुद्धिः—(स्वगतं) एष मुक्तश्चेदमरेश्वरः एतत्पश्चादुन्मत्तो मां स्वाधीनं करोति । अहमप्येतस्य राज्ञः पश्चादहमेव भूमिरक्षको भविष्यामीति मे मनोरथः । पार्थिवस्यापि संततिर्नभवतु तावदेनं वक्ष्ये । (प्रकाशं ।) वध्य एव एषः ।

राजा—धिग्दुष्टबुद्धे त्वंते नामसदृशोऽर्थतोऽपि तथैव वदसि ।

दुष्टबुद्धिः—(आत्मगतं ।) सत्यमित्थंभूत एवास्मि । किंतु दुष्टबुद्धिरि-त्यहं ज्ञातोऽद्य एव । (प्रकाशं) मुच्यतामेवातो यतः पुनरयं युद्धाय त्वामाह्वये-दिति कथितवानस्मि भवते ।

राजा—न खल्वयमुन्मत्तो भवतीति यतः पश्चात्तापमुपगतो एषः । अथवा उन्मत्तश्चेदपि उन्मत्तगर्वनाशकोऽहमेव तथाहि ।

प्रमादोन्मत्तशत्रूणां तन्मदस्य विनाशकः ॥
भूयात्तथा महाराजः शरणागतरक्षकः ॥ १४ ॥

अमरमहिषी—सम्यगयमाह राजा दुष्टबुद्धिंप्रति । राजन् पुष्पसेन त्वच्च-रणगतानस्मान् भर्तारं च पाहि । तथाहि ।

मत्पादं शरणागतस्य वसुधाकंठस्तथा द्वेषिणः
स्त्रीव्यूहस्य न शून्य एव भविता शून्या न भूयादिति ॥
ज्ञात्वा मंगलसूत्रया नृपवर पाहीति याचे पतेः
भूमिः पालनकर्मणा पतिमसुं स्त्रीणां जनं मादृशं ॥ १५ ॥

राजा—जानन् मुंचाम्येनं स्त्रीजनं च । इति तं मुंचन् कथयति ।

अमरसेनकरं प्रतिवार्षिकमवनिमेव च पालय यच्छसे ॥
सविनयं नृपते भवतां प्रजां गमनकर्मणि सक्तमनाः पुरं ॥ १६ ॥

अमरेशः—तथा यथा वदसि करोमीति सभार्यो निष्क्रांतः ।

राजा—इतस्ततः परिक्रामन् । इदमस्मद्गृहं यावत्प्रविशामीति प्रविश्य । अये शून्यमस्मद्गृहं । कः कोऽत्र भोः ।

प्रविश्य **दौवारिकः**—जयतु जयतु महाराजः । आज्ञापयतु देवः ।

राजा—मे भोगिनीमाह्वय क्षुधाऽत्यंतं पीडितः पतिः तस्य कृते अन्नादि गृहीत्वाऽऽगच्छेति ।

दौवारिकः—यद्येवाज्ञापयतीति निष्क्रांतः (ततः प्रविशति राज्ञी चेटी च) राज्ञीसमीपमागत्य भोजनायोत्तिष्ठत्वार्यपुत्र : । (राजा तथा करोति ।) राज्ञी हंडे इत आनयत्वत्यस्तगतमन्नं ।

चेटी—तथा भवत्विति तत्पुरो न्यस्य राजन् भुज्यतामिदमन्नं ।

राजा—(भुक्त्वा सानंदं) प्रियेऽद्य मे श्रमनाशोऽभूत् । निद्रां करोमीति स्वपति । ततो उत्थाय प्रातोऽयं कालः । कः कोऽत्र भोः प्रविश्य ।

दौवारिकः—राजन्नाज्ञपयतु ।

राजा—सेनपतिस्तावदाह्वयतां । एवं सचिवं विज्ञापय अद्य पौरकार्यं भवानेवप्रेक्षतां अहमपि मृगयायै गच्छामीति ।

दौवारिकः—तथेति (निष्क्रांतः ।) ततः प्रविशति सेनापतिः ।

सेनापतिः—जयतु जयतु राजा ।

राजा—किं सेनापते पूर्वगामिनः सर्वे मृगादीन् वने संमील्य तिष्ठंति ।

सेनापतिः—अथ किं ।

राज्ञी—हंडे चर मृगयायै गच्छत्वार्यपुत्रः वयमपि गृहं गच्छाम इति चेट्या सह निष्क्रांता ।

राजा—तेन हि यास्याम इति सेनापतिना सह निष्क्रांतः ।

ततः प्रविशति सभार्यो दुष्टबुद्धिः ।

दुष्टबुद्धिः—प्रिये पुरा गौतममुनेः सेवानिरताय मे तेन वरो दत्तः ।

प्रिया—आर्यपुत्र किमिति ।

पतिः—सम्राट् त्वमेव भवसीति ।

प्रिया—वीर्यार्णवे पुष्पसेने स्थिते कथमेतत्संभाव्यते ।

पतिः—अस्य पश्चादिति । अस्य संततिर्न एतत्पश्चादहमेव राज्ञः वधूशतं तथान्यामपि हत्वा भूमिं रक्षामि । तथा तेन एवं कथितं । पश्य ।

नीलसेनतनयाऽधिगम्यते तां समीक्ष्य नृपतिर्व्यलोभयेत् ॥
तत्र दीर्घवसतिस्तदाप्यते तस्य दंडधरेकेण तं प्रिये ॥ १७ ॥

प्रिया—(सहर्षं) युज्यते ।

नेपथ्येकलकलः ।

सचिवः—एष राजा मृगयां कृत्वाऽऽगच्छति ।

नेपथ्ये कलकलानंतरं ।

भोभो सेनापतिमुख्याः पश्यतैनं हन्यमानं मदगजं । तथाहि ।

स्वजीविते मुंचति संशयं च विकारवद्वद्रुधिरेक्षणास्यः ॥
गर्जन् समायाति ममाभिभूत्वाकरोनिहंता घट भग्नमेनं ॥ १८ ॥

सचिवः—तेन हि गच्छाव इति निष्क्रांतौ ।

ततः प्रविशति ससेनापतिपुरःसरो राजा ।

राजा—सेनापते स्वकर्मानुष्ठीयतां ।

सेनापतिः—यद्येवाज्ञापयतीति निष्क्रांतः ।

राजा—(परिजनं विलोक्य) त्वमपि स्वकर्मनिरतो भव । सोऽपि तथेति निष्क्रांतः । नेपथ्ये अयमहमागतोऽस्मि । प्रविश्य प्रतीहारी ।

प्रतीहारी—जयतु जयतु भर्ता । एष शतधन्वनामा भवद्गुरुरुपास्थितः ।

राजा—(सादरं) किं गुरुर्मे शतधन्व आगतः ।

प्रतीहारी—अथ किं ।

राजा—तेन तं ह्याविलंबितं प्रवेशय ।

प्रतीहारी—तथेति निष्क्रांता ।

ततः प्रविशति पालहस्तो गुरुः ।

गुरुः—जयतु जयतु महाराजः ।

राजा—(वीक्ष्य आसनादुत्थाय) अभिवादये भवंतं ।

गुरुः—जयोऽस्तु ।

राजा—उपवेश्यतामासने ।

गुरुः—(उपविश्य) भवानुवपविशतु ।

राजा—तथेत्युपविष्टः ।

गुरुः—अपि कुशलं ते राज्यं ।

राजा—सर्वं कुशलं ।

गुरुः—अमरेशोऽपि तेऽधीन इति मन्ये ।

राजा—सोऽधीनो भवदनुग्रहात् ! सर्वं मे सौख्यमेवददाति किंतु एषा निष्पुत्रता मामत्यंतं पीडयति । तथाहि ।

पितरो मम संधिग्धाः को ददाति कुले जलं ॥
पिंडानि पश्चादेतस्य पुष्पसेनस्य नेति नः ॥ १९ ॥
राज्याधिरोहणं सूनोर्नेक्ष्ये तस्य सुविक्रमं ॥
शत्रून् जित्वा समायातं कदा हर्षितपुत्रकं ॥ २० ॥

गुरुः—अलमत्यंतपुत्रशोकेन ॥

राजा—कथं न जायते भवत्सदृशे गुरुवर्ये मे प्रजा ।

गुरुः—(करेण नासिकां धृत्वा किंचिद्ध्यात्वा) राजन् ते प्रजा दरिद्रद्विजकलादरेण जायते इति ।

राजा—द्विजादरः कर्तव्य एव ।

गुरुः—पुष्पाण्यानयतुं वयमपि गच्छाम इति निष्क्रांतः ।

राजा—(सखेदं) पुत्रहीनस्य मे का गतिर्भवतीति न जाने (नेपथ्ये अयमहंदरिद्रोऽस्मि) तथाहि ।

उदधितटतः दृष्ट्वा दृष्ट्वा ह्यतीव सुरूपिणी
मयि च सुनरान्केयं धन्यामयेत्यनुपृच्छति ॥
कुसुमपुरपस्येयं विद्धि यशस्तनयाऽब्रुवन्
त्वहमपि विभो निश्चित्यैनामिदंग्रहमागतः २१ ॥

राजा—कः कोऽत्र भो प्रविश्य ।

दौवारिकः—एष दरिद्रद्विजकुमारः प्रतिहारभूमिपास्थितः ।

राजा—तेन हि अविलंबितं तं प्रवेशय ।

दौवारिकः—तथेति नीष्क्रांतः ।

ततः प्रविशति काष्ठभारहस्तो दरिद्रद्विजकुमारः ।

द्विजः—जयतु जयतु महाराजः ।

राजा—भवंतमभिवादये ।

द्विजः—स्वस्ति भवते ।

राजा—उपविशत्वासने भवान् ।

द्विजः—तत्काष्ठभारं तत्पुरो निधाय उपविशति ।

राजा—किमर्थं काष्ठभारः ।

द्विजः—तच्च कथयामि श्रूयतां ।

किं दग्धं मनुजा भवद्भिरिति तान् सर्वान्मयि पृच्छति
ऊचुस्ते दहतीति नैव नरपाः प्राप्तोऽस्मि न त्वां विना ॥
अग्न्यास्त्रेण मया वनं रिपुकुलं तत्काष्ठभारस्त्वतो
ज्ञात्वाऽहं भुवि कोपि मे निधनता तत्काष्ठभारं दह ॥ २२ ॥

राजा—(अयमतिदरिद्रोऽस्तीति विज्ञाय) कः कोऽत्र भोः । प्रविश्य

प्रतीहारी—आज्ञापयतु देवः ।

राजा—कंचुकिनं प्रवेशय ।

प्रतीहारी—तथेति निष्क्रांता ।

ततः प्रविशति कंचुकी ।

कंचुकी—विजय स्व राजन् । प्रेक्षिताः प्रमदवनभूमयः ।

राजा—भवतु सुवर्णपूर्णो हेमकलशोऽस्मै दीयतां द्विजाय । कंचुकी तथेति निष्क्रम्य हेमकलशं गृहीत्वा पुनः प्रविश्य ।

राजन् अयं हेमकलश इति पुरो निधाय निष्क्रांतः ।

राजा—ब्रह्मन् गृह्यतां हेमकलशः ।

द्विजः—तं हेमकलशं गृण्हन् (सहर्षं) भूपते युक्तं त्वयीदं कर्म ।

नीलसेनसुतया रममाणस्सार्वभौमतनयो भवतीति ॥
त्वत्त एव नृपते ललनाया माशिषं प्रययुजे भुवि तस्यां ॥ २३ ॥

साधयामस्तावदिति निष्क्रांतः ।

राजा—

एतद्द्विजस्य वचनं सत्यं भवतीति मन्मनो वेत्ति ॥
ऋषि विप्रवाक्य संघः सज्जनपंडितसुसंमतश्चेति ॥ २४ ॥

वयमपि गच्छाम इति निष्क्रांतः ।

इति निष्क्रांताः सर्वे ॥ इति पुष्पसेनतनयराज्याधिरोहणनाटके प्रथमोंकः ॥

अथ द्वितीयोंकः ।



ततः प्रविशति राजा ।

राजा—(साचिंतं निश्वस्य) भोः कष्टमसूनुता । मे प्रजा कथं स्यात् । अथवा लब्धो मया द्विजवरः । तथाहि ।

गुरुर्यश्च मे शतधन्वनामा न्यवेदयत्तस्य वचानुसारात् ॥
दरिद्रविप्रादरतो भवेत्ते प्रजेति विप्रेण वरोपि दत्तः ॥ १ ॥

(नेपथ्ये । अयमहमागतोऽस्मि)

राजा—नीलसेनेन दत्तास्यात्तनया मे ।

ततः प्रविशति प्रतिकृतिपत्रहस्तो दूतः पटाक्षेपेण ।

दूतः—राजन् ते दत्ता दत्ता ।

राजा—केन ।

दूतः—नीलसेनेन ।

राजा—का ।

दूतः—तत्तनया ।

राजा—(स्वगतं) दत्ताशब्दोनेन गृहीतः ।

दूतः—तेन प्रोषिते प्रतिकृतिपत्रिके च ।

राजा—इतः पत्रिकामानय ।

दूतः—तां ददाति ।

राजा—वाचयति । तथाहि ।

बाळावती हि तनया सुभगा मया ते दत्ताऽधिराजगुणपूर्णकुपालकाय ॥
सामंतचक्रशिरवेष्ठनवर्तिमाला श्रीजुष्टपादसरसीरुहकाननाय ॥ २ ॥

सा गृह्यतां इति तेन लिखितं ।

दूतः—तस्याः प्रतिकृतिर पिप्रेषिता ।

राजा—सहर्षं इतः प्रतिकृतिमानय ।

दूतः—तां ददाति ।

राजा—(गृहीत्वा पश्यति) अहह किमिदंरूपं । स्वगतं ।

एनां रूपमृदूरुपीनसुकुचद्वंदादिभिः शोभितां ।
दृष्ट्वा को भुवि मानवस्त्वदधिजारूपोऽपि तुच्छीकृतः ॥
वज्रं किं नु पयोधरेण कदलीस्तंभोऽपि काठिन्यके ।
त्वस्यास्त्यागरतो भवेज्जडमतेर्हीनोकयुग्मे नहि ॥ ३ ॥

भवतु तावदेनं वक्ष्ये । (प्रकाशं ।) एषा मे रोचते गृहीता ॥

दूतः—तर्हि रथाधिरोहणं क्रियतां ।

राजा—कः कोऽत्रभोः प्रविश्यदौवारिकः ।

दौवारिकः—जयतु २ राजा ।

राजा—मद्वचनादमात्यं दुष्टबुद्धिं ब्रूहि । अहं नीलतनयामुपनिमंत्र्य यावदागच्छामि तावत्पौरकार्यमावेक्षतामिति ।

दौवारिकः—यद्देवाज्ञापयतीति निष्क्रांतः ।

राजा—वयमपि गच्छाम इति । रथमधिरुह्यदूतेनसहनिष्क्रांतः । ततः प्रविशति सभार्यो नीलसेनः ।

नीलः—प्रिये सुतापरिणयोद्देशेनदूतस्तस्मै प्रेषितः ।

प्रिया—कस्मै ।

नीलः—पुष्पसेनाय । अस्मत्सुतया बालावत्या युक्तवरश्चोपलब्धः ।

नीलः—(साशंकं ।) पुत्रिका तस्मै रोचते वा नवा । प्रविश्यपटाक्षेपेण दूतः ।

दूतः—रोचते रोचते ।

राजा—(दूतमालोक्य ।) कस्मै ।

दूतः—पुष्पसेनाय ।

राजा—का ।

दूतः—भवत्तनया ।

राजा—किं संभ्रांतोऽसि ।

दूतः—नहि नहि सर्वं कथयामि । पश्य ।

तनयारोचते राजंस्तव मेऽत्यंतमेव च ।
तस्मात्त्वन्नगरं प्राप्तस्त्वद्दर्शमना इति ॥ ४ ॥

राजा—भवतु अभिमुखंगत्वा आदरसत्कारपरो भूत्वातेन सहागच्छाम इति ताभ्यां सह निष्क्रांतः ।

ततः प्रविशति कंचुकी आज्ञापितोऽस्मि नीलसेनेन । क्वगता बाळावती दासी साऽन्वेष्यतामिति । इतस्ततः परिक्रामन् । (आकाशे कर्णं दत्वा ।) किंबवीषि बाळावती विवाहार्थं मंगलसमालंभनानि गृहीत्वाऽऽयातीति । भवतु याहि । अहमपि ब्राह्मणानाव्हयामि । भोभो ब्राह्मणा आगच्छंतु भवंतः । नील-ग्रहं । स स्वतनयापरिणयार्थं भवतोऽऽहूय वो दक्षिणां ददाति । अहमपि विप्रा आगच्छंति निवेदयामीति निष्कांतः ।

ततः प्रविशंति चत्वारो भूसुराः । तत्र

भीमभट्टः—सर्वे वयमिदानीं नीलग्रहं गच्छाम ।

द्वितीयः—भवतु तत्र पाकोऽपक्व एव दृश्यते ।

तृतीयः—दास्याः पुत्र किं तेनापक्वेन सुपक्वेन वा ।

चतुर्थः—पाटच्चल ह्यः किल कलिंगराजग्रहे पोलिका निष्पक्वा एव । अतोऽस्मदुदरं आमज्वरपीडितं तत्पोलिकाभक्षणेन । इदानीमपि आमपीडा न निष्क्रामति ।

द्वितीयः—अष्ट अष्टरूप्यकानेकस्मै एकस्मै ददाति नीलः । तथाहि

दीयते भोजनं राज्ञा नीलसेनेन वाह्यते ॥
अस्मभ्यं दक्षिणा कृष्ण घृतकुल्यो महोत्सवे ॥ ५ ॥

कृष्णः—दक्षिणा कियद्दीयते राज्ञा ।

द्वितीयः—पुरैव कथितं मया । अष्ट रूप्यकानेकस्मै २ ददाति किं पुनर्दक्षिणा पुनर्दक्षिणा इति जल्पसि ।

कृष्णः—पुरा सुमंतुशर्मा विप्रः पंचत्वमागतः । तदैकादशादिदिने भोजनाय । गताः स्मः । तज्जनकोऽस्मभ्यं प्रत्येकशः द्वौ द्वौ रूप्यकौ दीनोप्यदात् । एष तु भूप एव ।

प्रथमः—विधवापुत्र अलं तवा मंगलभाषणेन ।

भीमः—अनयामंगलभाषया पुष्पसेनो मृयत इति कल्यते । मृतोऽपि तत्तनयोजीवयत्येनं ।

प्रथमः—दास्याः पुत्राः किमेवं भाषणान्यत्रोदाहरत अयोग्यानि भीमभट्ट त्वमपिअविवेकी पुरुष इव भाससे ।

तृतीयः—कृष्णसूपोऽपि लवणहीन एव ।

प्रथमः—दास्याः पुत्र पाको न चिकित्छितव्यः। त्वरस्व त्वरय गच्छाम। सर्वे तथेति निष्कांताः।

ततः प्रविशति जामातृसहितो नीलः।

नीलः—बाळावत्या प्रसवादस्मद्गृहे तिष्ठतु भूप भवान्।

पुष्पसेनः—नहि नहि गंतव्यमेव स्वनगरं।

नीलसेनः—बास्तव्यं अस्मद्गृहे यदा प्रसूता तनया तां गृहीत्वा यात।

पुष्पसेनः—तथा वसामि।

नीलः—तर्हिगच्छाम ग्रहंप्रति भोजनाय।

उभौ—तथेति निष्क्रांतौ।

ततः प्रविशति रुदन् शिष्यः।

शिष्यः—एष राजा पुष्पसेनो मूर्ख एव। गांधर्वेण तां परिगृह्य तत्क्षणमेव स्वपुरंगंतव्यं। तत्यत्का राज्यपालनसुखं तां वीक्ष्य लोभौदत्रवावसत्। इदानीं नवमज्वरग्रस्तः। तस्य कृते सर्वव्याधिधूमकेतुं वैद्यमाह्वयेति नीलसेनेनाज्ञापितो ऽहं। भवत्वाह्वयामि। वैद्यमुख्या आगच्छध्वं आगच्छध्वं २ नीलसेनग्रहं प्रति। वैद्यो आगत इति कथयं ामीति निष्क्रांतः।

ततः प्रविशति दीनमुखभार्यया समंनीलः। बाळावतीच। बाळावती। रुदति।

नीलसेनः—वत्से किं रोदनेन ते दुर्दैवात्पतिः परलोकमितो गतः।

तद्भार्या—भोः कष्टं कष्टं।

राजा—कः कोऽत्रभोः।

प्रविष्यदौवारिकः—

दौवारिकः—आज्ञापयतुभर्ता।

नीलसेनः—बुधक मद्वचनादुच्यतां दुष्टबुद्धिः।

दौवारिकः—किमिति।

राजा—एवंविज्ञापय। दुष्टबुद्धे।

दुर्दैवात्पुष्पसेनस्तव च पितृसमो नीलसेनाख्यपुत्र्या।
भर्ता लोकस्य मातुःर्यमपुरवसतिं निर्गतो दुष्टबुद्धे॥
ज्ञात्वैनां पालय त्वं भुवमधिकमते सिंधुसीमां तथास्या।
आदेशेनैव मातुस्तवनृपतिरसौ याचते त्वां प्रणम्य॥ ६॥

दौवारिकः—यद्देवाज्ञापयतीतिनिष्क्रांतः ।

बाळावती—(दक्षिणाक्षिस्पंदनं सूचयित्वा ।) अंमो दक्षिणाक्षिस्पंदनं निमित्तानि कथयति ।

नीलः—शांतं पापं शांतं पापं प्रतिहतममंगलं । तदा दक्षिणाक्षिस्फुरणे-नैव नाथो मे परलोकंगतः । हा नाथ पुष्पसेन बालावतीलतासंतापनाशक मा-मेकामनाथां विलपंतीं त्यक्त्वा क्वासि गतः ५ प्रयच्छ मे प्रतिवचनंइति मोहमुपगता ।

राजा—वत्से समाश्वसिहि समाश्वसिहि हा पुष्पसेन किं मे कोपयुक्तो यमलोकं गतोऽसि ॥ तथाहि ।

गच्छंतं स्वपुरं मासौरुरुधे चापलो नृपः ।
तस्मात्क्रुद्धो गृहीत्वा तां गंतव्यं चेति किंगतः ॥ ७ ॥

बाळावती—(लब्धसंज्ञा) नाथ किं मह्यं क्रुद्धः परलोकं गतोऽसि ॥ तथाहि ।

अत्यंतं त्वयि मम सार्धवर्तितुडे ।
नाथो भो नृपवर आननाद्गृहीते ॥
तांबूलं प्रसभमयं नृपो ननंद ।
माता नौ शिथलितनीवि प्राप्य यातः ॥ ८ ॥

इति मोहमुपागता । वत्से अलमत्यंतभर्तृपुष्पसेनवियोगदुःखेन ।

बाळावती—(लब्धसंज्ञा ।)

आलिंगनादि विरहय्य ममांगमंगैः ।
कायेश गुप्तपरिभाषणमाशुत्यक्त्वा ॥
क्रुद्धो यमस्य वसतिं कथमाप्तवांस्त्वं ।
भार्यापि ते ह्यनुपदं प्रतियाति वन्हिं ॥ ९ ॥

भवतु चिताप्रवेशेन भर्तारं संगच्छामि । भोः चितां प्रज्वालय कोऽत्र । अहो कोऽपि नाज्ञापरः ।

नीलः—वत्से किमनेन साहसेन मा कुरु चित्ताप्रवेशं ।

(नेपथ्ये) आगताः स्मः ।

राजा—कः कोऽत्रभोः । प्रविश्य दौवारिकः ।

दौवारिकः—राजन् एते दुष्टबुद्धेरादेशमादाय प्रतिहारभूमिमुपस्थिताः ।

राजा—त्वरितं प्रवेशय तान् ।

प्रविश्य दूताः । दौवारिकः निष्कांतः ।

दूताः—राजन् स्वस्ति भवते । दुष्टबुद्धिरेवमकथयत् ।

राजा—किमिति

दूताः—

बाळवती मे महिषीभवेच्चे
त्तामानयध्वं भवनं हि दूताः ॥
किमन्यथातद्वहने विबोध्य
दुष्टातमानीय विघातयध्वं ॥ १० ॥

एवं किल तस्याभिप्रायः मातृभक्तिर्नो मुखरयति । अतः अस्माकं माता बाळावती परराष्ट्रं यातु । वयमपि सा तत्र नास्तीति कथयाम ।

राजा—भवतु तथा करोमि ।

दूताः—वयमपि एतद्वृत्तांतं दुष्टबुद्धिसचिवाय निवेदयिष्याम इति निष्कांताः ।

राजा—वत्से एष उन्मत्तो एवं मंत्रयति कथमिदानीं करोषि ।

बाळावती—कष्टं कष्टं चिताप्रवेश एव श्रेयान् ।

राजा—मा कुरु मा कुरु । तद्दुष्टबुद्धिगर्वनाशकममरेश्वरं शरणं गच्छ-यतः अत्र वससि चेन्मां जित्वा त्वां गृहीत्वा अरण्ये हनिष्यति ।

माता—हा कष्टं कष्टं आनवममासादुदरे मे स्थित्वा मया रक्षिता इदानीं स्वजीवनाशभयात्परनृपतिममरेश्वरं गच्छासि किं । वत्से न गच्छ ।

बाळावती—तात कथं गच्छामि साक्षान्मातापितरौ विसृज्यामरेश्वरपुरं प्रति ।

राजा—वत्से किमेवं चंचलासि । पश्य

तं नत्वा ह्यमराधिपस्य नृपतेः पादे सुते याचनां
शीर्षे न्यस्य कुरुष्व मे वसतितात्वत्रैव भूयादिति ॥
दुष्टान्मां सचिवाच्च पाहि नरपभीतां सुतां ज्ञापयन्
ज्ञात्वा त्वं वचसा तथेतिमनसा रक्षत्यसौ भूपतिः ॥ ११ ॥

बाळावती—कथं गच्छामि । माता--आलिंगनं देहि मे । तेऽधुना मुखं कथं द्रक्ष्यामि ।

माता—यदा त्वं तनयं प्रसूयते नाभिनंद्यते रिपुकुलं दग्ध्वा तं दुष्टबुद्धिमपि तदा द्रक्ष्यसि ।

बाळावती—अहं सुतं प्रसूतऽपिस रिपुकुलं हत्वा तं दुष्टं हनिष्याति वानवा । प्रविश्य पटाक्षेपेण दूतः ।

दूतः—सत्यं हनिष्यति हनिष्यति ।

बाळावती—कः ।

दूतः—दुष्टबुद्धिः ।

बाळावती—कं ।

दूतः—तं वधूशतं हत्वा त्वां च हनिष्यति ।

बाळावती—न हि गच्छामि अमरेश्वरपुरं ।

दूतः—अहमपि यामीति निष्क्रांतः ।

बाळावती—तातं परिष्वज्य तात गच्छामीदानीं ।

राजा—वत्से चर वयं यास्याम इति ताभ्यां सह निष्क्रांतः ।

ततः प्रविशति दुष्टबुद्धिः ।

दुष्टबुद्धिः—इतस्ततः परिक्रामन् । अयं पुरा गौतममुनेः वचानुसारात् पुष्पसेनो नीलसेनत यामुपतिमंन्त तत्रैव मृतः । अहमपि तां मृगमाणो हंतुं नोपलब्धा । दूतास्तस्मै सत्यभावं कथयेयुः स्यात् अथवा कृतं संदेहेन । नीलसेनपुरे सान स्थिता कुत्र गमनशीला स्यात् भवतु मृगयाम इति निष्क्रांतः ।

ततः प्रविशति सिंहासनस्थोऽमरेश्वरः । सचिवश्च ।

राजा—सचिवकोऽपि उन्मत्तः कार्यं न कारयेत् । मरणाय प्रमादः कल्पते ।

सचिवः—युक्तमिदं ते वचनं ।

राजा—पश्य ।

प्रमादात्कुरुते कर्म मनुजः पातकं सुकृत्
मन्यते तत्फलं पश्चात्प्राप्नोत्येव न संशयः ॥ १२ ॥

सचिवः—अथ किं । नेमथ्ये दीनाऽहं प्राप्ताऽसि ।

राजा—कः कोऽत्रभोः ।

प्रविश्य

दौवारिकः—एष नीलतनया बालावती प्राप्ता ।

राजा—किं मे मातृसदृशा बाळावती प्राप्ता ।

दौवारिकः—अथ किं ।

राजा—किमेकाप्राप्ता उत ससैन्या ।

दौवारिकः—एकैव प्राप्ता ।

राजा—क्षिप्रं तां प्रवेशय ।

दौवारिकः—यद्देवाज्ञापयतीति निष्क्रांतः ।

ततः प्रविशति बाळावती दीना ।

बाळावती—हा त्रायस्व राजन् राजन् मामितिपादयोः प्रणम्य ।

पिता भूपोऽयंत्वं मम सफलतां दुष्टसचिवा-
त्प्रमादादुन्मत्तो हननिरतोऽत्यंतमधुना ॥

अमरेशः—वत्से अलं दुष्टबुद्धिभयेन ।

बाळावती—

याच्ना मे नीलो न वसतिरभिभूयात्तुसदने ॥
सुतां ज्ञात्वा पाहि अमरनृपते मामभिगतां ॥ १३ ॥

अमरेशः—वत्से अलं तद्भयेन । किंतु दुष्टबुद्धिगर्वनाशक पुष्पसेने स्थिते मत्तः परित्राणं किमिच्छसि ।

बाळावती—कुतोऽद्यापि पुष्पसेनः यमलोकं गतः ।

राजा—किमेषा वार्ता । हा वीर्यार्णवपुष्पसेन हा शरणगतं मां मे सुवचनानि कथयित्वा रक्षकवासि गतः । प्रयच्छ मे प्रतिवचनं । अमरसेन मे प्रतिवार्षिकं बलिमुपहरेति कथितं इदानीं बलिं गृहण राजन् ।

बाळावती—अलं पितृशोकेन । तस्मादुन्मत्तो मां मे महिषी भवान्यथा त्वां मारयामि इति वदति ।

राजा—सशिरःकंपं । युज्यते अपि पुष्पसेने स्थिते इदृशो दुष्टः कथं स्यात् । तस्य पराक्रमं पश्य ।

आसमुद्रतद्रतो नरपौघस्तस्य पादजलजाहितशीर्षः ॥
याचति स्मपुरतोऽजालिबंधस्तं ननाम कृपयार्चनकर्मा ॥ १४ ॥


बाळावती—सत्यं महाप्रभावो मे भर्ता । इदानीं तस्मान्मां रक्ष ।

अमरसेनः—बाळावति रक्षामि मातृसदृशां । किमलीकाश्वासनाभिरत्र ।

दुष्टो भ्रातु विमत्तबाहुबलसंनाशाय दीक्षैः पुरं ।
बाणैस्ते सचिवं यमस्य भवने युद्धेऽतिथिं विद्धि तं ॥

मातस्तद्भयविक्लवात्किमिति नो च्छायां करोमीति ते ।
माता मे वस त्वं ग्रहे शठमतिर्नोयाति किं तद्भयात् ॥ १५ ॥ -

भवतु प्रियं मे कथयामि । एनां मे मातरं पुष्पसेनभार्यां बाळावतीं पूज्य-भावेन भजस्वेति । मातः चेरम ग्रहं प्रति । वयमपि गच्छाम इति निष्क्रांताः सर्वे । इतिद्वितियोंकः ॥



अथ तृतीयोंकः ।



ततः प्रविशति दुष्टबुद्धिः ।

दुष्टबुद्धिः—बाळावतीं मृगमाणोप्यहं तां न प्राप्तः । भवत्विदानीं किं करोमि सेति तृतीयमासपूर्णा अंतर्वत्नी श्रुतवानस्मि । मयि मृगमाणे तामयनमेकं गतं कुत्र गमनशीला स्यात् ॥ सचिंतं निश्चस्य । आः ज्ञातं । मम दुष्टबुद्धेः प्रवेशस्तस्यामरेश्वरस्य पुरे न स्यादिति तत्र गता भवेत् । तत्पुरमेव गच्छामि । कः कोऽत्रभोः ।

प्रविश्यदौवारिकः ।

दौवारिकः—आज्ञापयतुदेवः ।

दुष्टबुद्धिः—सेनापतिस्तावदाहूयतां । सारथिं विज्ञापय । ससैन्यं सबाणासनं रथं कल्पय बाळावतीमत्रानयतुं ।

दौवारिकः—तथेति निष्क्रांतः ।

दुष्टबुद्धिः—अहममरावतीं गत्वापि तत्पुराधिपतिरमरेश्वरस्तां प्रेषयति न वेति संशयः । भवत्वेवं कार्यं । पूर्वं मे मातरं बाळावतीं अमरेश्वरपुरं प्रति प्रेषय । एतच्छ्रुत्वा वचनं तां प्रेषयति चेत् मे मनोरथः पूर्णः । अन्यथा तेनसह प्रयुध्य गहने तामानीय तं जित्वा हनिष्यामि । युद्धे निष्णातो दृष्टश्चेत्सात्वनोपायेन तं विश्वास्य स्वमनोरथं यामि ।

ततः प्रविशति सेनापतिः ।

सेनापतिः—जयतु जयतु देवः । उपसृत्य । रथस्ते सज्जः ।

दुष्टबुद्धिः—तर्हि गछाम तत्पुरममरावतीनामकं इति तेनसह निष्क्रांतः ।

ततः प्रविशत्यमरेश्वरः सचिवश्च ।

राजा—बाळावतीमद्य नापश्यं गृहे ।

सचिवः—बाळावती किमपि स्नुषया समं भाषमाणा तिष्ठति ग्रहे भवतां ।

राजा—किं मे भार्यया समं भाषमाणा तिष्ठति तिष्ठतु तपश्विनी ।

(नेपथ्ये ।) अयमहमागतोऽस्मि ।

राजा—कः कोऽत्रभोः ।

प्रविश्य दौवारिकः ।

दौवारिकः—जयतु जयतु महाराजः ।

राजा—दूतमालोक्य रेरे कः प्राप्तः ।

दूतः—दुष्टबुद्धिः प्राप्तः ।

राजा—त्वरितं प्रविशतु दुष्टबुद्धिः ।

दूतः—यद्देवाज्ञापयतीति निष्क्रांतः ।

ततः प्रविशति दुष्टबुद्धिरेक एव ।

दुष्टबुद्धिः—विजयस्व राजन् ।

राजा—इत उपविश ।

दुष्टबुद्धिः—अमरेश्वरमातरं मे बाळावतीं प्रेषय । पादयोः प्रणम्य । रुदति तनयो मातर्मातः पितः पित इत्यसौ ।

अमरसेनः—एतद्वचनं ते वचस्येव पश्यामि न मनसि ।

दुष्टबुद्धिः—अमरनृपते वाण्यां सत्यं मनस्यपि विद्धि तत् ।

अमरसेनः—येषां मनसि सत्यभावः स एव वचस्यस्ति ते मनस्विनः । त्वं तु दुरात्मा ।

दुष्टबुद्धिः—स्वपुरमभिगम्याशु माता सुतान्परिरक्षतु ।

अमरसेनः—ते वचसि न विश्वसामि ।

दुष्टबुद्धिः—यमपुरगतं श्रुत्वा शोकेत्यसौ हृदि दह्यति ॥ १ ॥

अमरसेनः—अतएव पितृवधशोकाकुलस्त्वं तत्पत्नीं बाळावतीं महिषीं भवान्यथा मारयामि किमिति वदसि ।

दुष्टबुद्धिः—कथमेवं भविष्यति । कर्णौपिधाय । अनेन तेऽयोग्यभाषणेन सत्यं कंपितमिव मे हृदयं ।

अमरसेनः—न तां प्रेषयामि ।

दुष्टबुद्धिः—अमरसेन परस्त्रीं बाळावतीं ग्रहे न्यस्यागम्यां गंतुशीलस्त्वं कथमधर्मभीरुः ।

अमरसेनः—(सरोषं ।) दुष्टबुद्धे अलं भाषणेन ।

श्रीशःसाक्षी न त्वहं विद्धि तत्र ।
एकांते त्वं यत्कृतं क्रीयतेयत् ॥
मिथ्यावा क्यान्नास्ति पापं च साम्यं
मिथ्या वाचो भाषमाणस्त्वमेव ॥ २ ॥

अनेन प्रमादभाषणेन मे त्वं यमपुरं गच्छसीति दृश्यसे ।

दुष्टबुद्धिः----त्वां प्रेषयित्वायमपुरं तां गृहीत्वा गच्छामि किं करोषि । युद्धायागच्छ त्वत्पराक्रमं पश्यामि ।

अमरसेनः----(विहस्य ।) ते पराक्रमं तदैवापश्यं पुष्पसेनामरसेनयोर्युद्धेप्रवृत्ते सति । तथाहि ।

बाणा मे हृदयं प्रविश्य परतस्ते निर्गतास्तत्र हि ।
मूर्छन् किं त्वकरोः किमत्र मृयसे युध्यामि जल्पन्निति ॥
गच्छ त्वं स्वपुरं दुरात्मपुरुषपृथ्वीमिमां पालयन् ।
तत्पूर्वं स्मरणं करोषि न हि किं बाणासनं सज्जतां ॥ ३ ॥

दुष्टबुद्धिः----(स्मृत्वा । स्वगतं ।) सत्यमयं पराक्रमी कथमिदानीं करोमि । गौतुम तदैव कथितं त्वया सम्राट् त्व मेवभवसीति । एतत्पत्तनाधिपतिस्तु तां न मुंचति । न वमासपूर्णगर्भा सा श्वःप्रभाते तनयं प्रसूय पट्टाभिषेकं करोति चेत्वं भंगवरो भविष्यसि । भवतु सांत्वनोपायेन एनमाश्वसयामि । तत्र विप्रलब्धश्चेदयं सत्यं महातपस्वी मान्यो गौतुममुनिरिति मन्ये । (प्रकाशं ।) अमरसेन परमार्थेन तन्न ज्ञेयं । मां रक्षस्व रक्षस्व इति पादयोः रुदन् पतति । मद्वचस्तत्कथमर्हति त्वयि ।

बाळावतीं प्रेषय भूमिपाल न तां रथे न्यस्य विघातयामि ॥
वीर्यार्णवे मे त्वयि का कथात्र सैन्येन युक्तो नगरं विशामि ॥ ५ ॥

अमरसेनः---(स्वगतं ।) अयं यदूब्रवीति तत्सत्यमेव भासते भवतु तावदेनं वक्ष्ये ।

दुष्टबुद्धिः---मुहुःपादयोः लुंठन् ।

मातुःप्रवीक्ष्य वेलां अत्यंतंशोकनिरतलोकश्च ॥
पृच्छंति मांसदा ते माता नःस्वर्दिनेऽयाति ॥ ६ ॥

अमरसेनः---(सकरुणं) भवतु तां प्रेषयामि । तां संभाव्य रक्ष पूज्यभावेन ।

दुष्टबुद्धिः---तथा करोमि यथा वदसि किं विशेषेण ।

माता यद्वदतीति तच्चशिरसा संधार्यमाणोऽनिशं ।
पृथ्वींरक्षति दुष्टबुद्धिरिति मां मन्नामके संशयं ॥
कर्तव्यं नृषतेऽर्थतोऽप्ययमिति दुर्बुद्धिरित्येव नो ।
विद्धि त्वं ह्यमरेश मूर्खमनुजो वाचः क्षमस्वावदत् ॥ ७ ॥

अमरेशः—कः कोऽत्र भोः । प्रविश्यदौवारिकः ।

दौवारिकः—जयतु जयतु महाराजः । आज्ञापयतु देवः ।

राजा—मातृसदृशां बाळावतीमाव्हय ।

दुष्टबुद्धिः—(सहर्षं ।) (स्वगतं ।) अनेन वचसा मे मनोरथः पूर्णो भवतीति मन्ये ।

ततः प्रविशति स्नुषया समं बाळावती ।

दौवारिकः—दैवेनाकारिता एषा । इतिनिष्क्रांतः ।

बाळावती—उपसृत्य दीर्घायुर्भवतु पुत्रः ।

अयरेशः—मातः वंदे । इत उपविशत्वासने ।

बाळावती—किमत्र मामाव्हयो दूतमुखेन । उत उपविशामि । दाक्षिणाक्षिस्पंदनं सूचयित्वा । अये मरणकालोऽऽगत इति सूचयतीदं दक्षिणाक्षिस्पंदनं ।

अमरेशः—प्रतिहतममंगलं । मातस्तेऽपरो दुष्टबुद्धिनामकः पुत्रस्त्वामाव्हयतीति त्वद्दैवमेव तथारूपस्त्वामाव्हयत् न त दूतः ।

बाळावती—शत्रुस्त्वामाव्हयतीति वद ।

तद्भार्या—हा कष्टं कष्टं नप्रेषयामि परराष्ट्रं प्रति तां ।

अमरेशः—युक्तमयं यद्वदतीति तत् ।

दुष्टबुद्धिः—मातः कथमेवं पुत्रं मां शत्रुरितिवदसि ।

अमरसेनः—नहि नहि तस्य बुद्धिः परीक्षिता ।

बाळावती—

युगपत्समीक्ष्य बुद्धिं मर्त्यानामेकवाक्यनिरतानां ॥
युक्तायुक्ता बुद्धिः जानन्नपि नजानाति दुष्टानां ॥ ८ ॥

तद्भार्या—न प्रेषयामि तां । सा स्वनगरं गच्छतिचेद्गुरुजनहीनमिदंग्रहं-भविष्यति ।

अमरेशः—गच्छतु माता स्वनगरं ।

बाळावती—भो नृपदुष्टाः स्वं कर्म यावन्न साधयति तावदेतद्वचनं अन्यथा मदोन्मत्तः कर्मीश्वरमपि न गणयति ।

राजा—अयं माता मातेति वदति कथयेवं करिष्यति रथे उपविश्य सैन्येन समं स्वपुरं विश ।

बाळावती—गर्भिणी दुष्टयुक्ता कुतः पत्तनप्रवेशं करोमि । पश्य ।

मेषान्विक्रियमाणानां कौटिकस्तत्र संस्थितिं । प्राप्य द्विगुणमूल्यं स तेभ्यो दत्वा हनिष्यति ॥ ८ ॥ वैतंसिक इवायं मां गृहीत्वा वने हनिष्यति ।

तद्भार्या—तदैवकथितं दुष्टबुद्धिरागतोऽपि तां मे मातरं न प्रेषयामीति कथमिदानीं गर्भिणीं प्रेषयसि ।

राजा—सा गर्भिणी तस्याः दुष्टबुद्धिरयं सौख्यदो भविष्यति । अन्यथा त्वमपि तया सह निर्गच्छ ।

बाळावती—ललाटलेखनं को व्यपोहति ईश्वरोऽपि न व्यपाहतित्वं वस मह्यं किमर्थं दुःखं भजसि । वत्स गच्छामीदानीं ।

राजा—भवतु गच्छ ।

बाळावती—तथेति निष्क्रांतातेन सह ।

राजा—वयमपि गच्छाम ग्रहं प्रति । इति भार्यया सह निष्क्रांतः ।

ततः प्रविशति ससेनापतिपुरःसरः । रथमधितिष्ठंती बाळावती दुष्टबुद्धिश्च ।

सेनापतिः—मातः गव्यूतिमात्रमस्मत्पुरं वर्तते ।

दुष्टबुद्धिः—अत्रैवसेनापते रथादवतारयतां दासीं ।

बाळावती—सेनापतेऽयंदुरात्मा तदामातर्मात इत्यवदत् दासींमामिति ।

सेनापतिः—नावतारयामि गहनेऽत्र तां मातरं ।

दुष्टबुद्धिः—अहमेवतावदेनामवतारयामि हंतु किं करेत्युत्तिष्ठति ।

सेनापतिः—आगच्छरे आगच्छरे दुष्टबुद्धे तावदेतस्याअंग मपि स्पृष्ट्वा पश्य । हनिष्यामि ।

दुष्टबुद्धिः—रेरेधर्मजानपि प्रजानां राज्ञोवचनपालनकर्मास्तीति मां कथमेवं भाषसे ।

सेनापतिः—विहस्य पश्यध्वं सैनिकाः धर्मज्ञो दुष्टबुद्धिरयंवर्तते । तादृशानि मंत्रयित्वादुष्टबुद्धिरिदानीं वंचयत्येनां । रेरे दुष्टबुद्धे पश्य ।

मात्रादत्तमिदं दुरात्मसचिवभुंजन्निमांतेभुवं ।
लज्याकास्ति नदृश्यते कथयमे भुत्कापि तामेवहि ॥
हत्वातन्नगरे नरेशजननीं मेपत्तनं प्रेषय ।
कोत्कैवं वदसीतिसिंधुवलयां रक्षामिधर्मोगतः ॥ ९ ॥

दुष्टबुद्धिः—भोसेनापते तदातथैव वक्तव्यंअधुनेदृशमेव कर्म करोमि ।

सेनापतिः—

कर्तव्यमादृशं कर्मनिश्चित्यैनां प्रभाषसे ॥
धनुर्मेसज्जमायातुबाणैः शीर्षं निवार्यते ॥ १० ॥

दुष्टबुद्धिः—सगर्वंविहस्य । सेनापतेत्वमेवं जल्पसि स्वप्रजाहननशंकित-हृदयः कथं हनिष्यामित्वां ।

सेनापतिः—पश्यध्वं पश्यध्वं सैनिकाः साक्षादन्नदांमातरं हंताऽयंप्रजा-हननाय शंक्यतेऽस्य हृदयमिति ।

दुष्टबुद्धिः—यमसदनं प्रेषयामित्वां ॥ इति सशरंधनुरादत्ते ।

मच्छराहृदयमेवविशंति जीवजीवतव छिंद्यबाणक ॥
मातृभक्तिपरिवर्तितयुद्धबणकान्दहदहेत्युदाहत् ॥ ११ ॥

सेनापतिः—तांबाणवृष्टिं छित्वारे रेवृथावीरोऽहं वीरोऽहमित्यात्तधन्वन् तेशरादग्धा अधुनाकिं करोषि ।

बालावती—वत्ससेनापते किंवृथाशस्त्रग्रहणेनालं । अयंदुरात्मात्वां हत्वा-मामपि हनिष्यतिमह्यं किमर्थमृयसे । अनुगच्छतमेव ।

वीरस्यसचिवस्याशु कृतांतस्येवरूपिणः ॥
कृपाशून्यस्यपादौ चप्राप्यत्वंहि सुखीभव ॥ १२ ॥

सेनापतिः—मातःएवंमावद । मयि जीवतितवांगमपि स्पृशतुदुष्टबुद्धिः । तथाहि ।

मातासुखंयातिहिचेत्सुतश्चसुतोऽपिमाताह्यतुलंप्रकष्टं ॥
नयःसुखीतांप्रतिप्रेषयित्वासकृत्रिमारिर्जननीतनूजः ॥ १३ ॥

तत्वयिदुःखं भुंजत्यांमातरि सेनापति दुःखंभजत्येवकुतः सौख्यं । दुष्ट-

बुद्धिः । रेरेसेनापते वृथाकिमर्थं मातुरस्यजसिते प्राणान् । इयमतिसुंदरीमहिषी भवतुत्वमपि सुतोभव । सैनिकः । सत्यंमत्तो दुरात्माऽय मित्याह ।

सेनापतिः—

महिषीसानतेऽनार्यनमां विद्धिसुतंनृप ॥
जल्पस्येवंमनोवेत्ति आयुर्नश्यतिचास्यहि ॥ १४ ॥

दुष्टबुद्धिः—स्वीकृतामिदंशरासनं । इतिधनुगृहीत्वा बाणवृष्टिंकरोति । सेनापतिः । अहह हंतअस्यबाणाग्रोमेहृदयं प्रविष्टः मामुद्धरतु । मामुद्धरतु देवइतिभूमौ पतति । सैनिकानांहाहतःसेनापतिरिति हाहाकारमिश्रितोरवउत्थितः ।

दुष्टबुद्धिः—सहर्षं । भोसैनिकाः सहृष्टमनसोभवत । एषहतोऽप्यपरं सेनापतिंकरोमि ।

सैनिकाः—(स्वगतं ।) दुष्टानामयंकालस्तमोगुणमयोऽस्तीति यत्पूर्वैः कथितंतत्सत्यमेष एव । प्रकाशं ।) भवत्विति नकिंचिदूचुरस्ययभयात् । दुष्टबुद्धिः । भोसैनिकास्तामित आनयध्वं । सैनिकाः । अधोमुखाः किमपि नकुर्वंति ।

दुष्टबुद्धिः—रेरेसैनिकनशृणोषिमेवचनं भवतुवयमेवतावदेनामवतारयाम इत्युत्तिष्ठन्तां रथादवतार्यहस्तमाकर्षति ।

बाळावती—रेरेमूर्ख अपसर अपसर दुष्टबुद्धिः ॥ प्रियतमेतमोऽपसरतुनापसराम्यहं तेपक्षपातीसेनापतिर्मृतः त्वांमांविनेदानीं कोऽपि नरक्षतिएतद्विचिंत्य मेमहिषी भूत्वा राजसौख्यंभुंजस्व किमत्रमृयसे वृथा । तथाहि ।

दासीसहस्रंतेऽधीनंराज्यपालनमेवच ॥
चुंबनंदेहिमेकांते ह्यंकमारोहणंकुरु ॥ १५ ॥

बाळावती—किमेवंजल्पसि मग्णमप्यधुनाश्रेयस्करमेव ॥

दुष्टबुद्धिः—

पर्यंकंदिव्यमारुह्याधरं तेपाययप्रिये ॥
पादसंवाहनंतेऽहंकरोमिवशगाभव ॥ १६ ॥
बुद्ध्याविचिंत्य विधिनाप्रथमेति तेकिं ;
सृष्टिःकृताप्रियतमे मनसाविचिंत्य ॥

लक्ष्म्याकृतिंकृतवतो सुरजेष्ठबंधो ।
मन्येनविस्मयमवाप तनूंविलोक्य ॥ १७ ॥
तस्माद्वृथाकिंमृयसेऽत्र कांते ।
एतेजनास्ते वशगाभवंति ॥
नकोपित्वामत्र हिरक्षतीति
मदंकमारोहसि चेन्नहंति ॥ १८ ॥

बाळावती—अनार्यययातेजिव्हया यामातामातेत्युक्तैयव तांकांतांप्रियेति वदसिमूर्ख अपसर । सैनिकः । दुष्टबुद्धे धर्मनिषिद्धकर्माणं त्वांदेवःकृष्णो नपश्यतीतिजानासि किं ।

दुष्टबुद्धिः—मामेवदेवः कृष्णइतिविद्धि । तथाहि ।

स्वकीयजनरक्षन्सो भूपतिश्शत्रुसंघहा ॥
विधवारोहणंकुर्वन्कृष्णः कमललोचनः ॥ १९ ॥
अपिच । पद्मनेत्रोऽहमपिभो भूपतिःक्रियतेऽरिहा ।
स्वकीयजनरक्षंश्च विधवारोहणंनर ॥ २० ॥

इतिबलात्तां कर्षति ।

बाळावती—एषमदांधः सन्नेवंमां मंत्रयति । कथमिदानीं करोमितदैवाग्नि-प्रवेसेन भर्तारमनुगच्छंतींमत्वा तातोरुरोध माकुरुचिताप्रवेशमिति । तत्तो-एतस्यभावमवधार्यापि गर्भिण्या अग्निसेवनंनिषिद्धत्वात् तातवचसाऽमरेशपुरं मागतां सोऽपि रक्षन्एतदुष्टहस्ताभ्यांसंरक्षितवान् । अथवाललाटलेखनमनु-सृत्य यद्भवतितद्भवतु । हेहरेरक्षेदानीं । नमः ॥ तेऽस्तु ॥ २१ ॥ पाहिमेश ॥ नारकान्मां ॥ २२ ॥ देहितेपादयोः ॥ भक्तिमेवाशुमे ॥ २३ ॥

दुष्टबुद्धिः—कांतेत्वंप्राप्यते चेदहंकउपविशामीति जानासि । सैनिकः । नरके ।

दुष्टबुद्धिः—किमहंनरके पताामि । विहस्य । आः कः पातयातिमां ॥ सैनिकः । श्रीकृष्णः ।

दुष्टबुद्धिः—किमेव जल्पसि । कृष्णंयमंच पातयामि ! भवतुकांते शीघ्रं-कथय । सत्यमावं । मे महिषीमवसिऽत मृयसे ।

बाळावती—मूर्खएवंमावद मरणमपिश्रेयस्करं ।

दुष्टबुद्धिः—तर्हिहरिस्मृतिं कुरु ।

बाळावती—(स्वगतं ।)

निंदंतांकुशलामां वासः सद्मनिसौरेः ॥
त्वत्पादंभजतां मेचित्तंमेशरमेव ॥ २४ ॥

दुष्टबुद्धिः—पादेन हन्यते

पादाहता साकृपणादुरुक्ष्या निपातितादुष्टमतेश्च भीमे ॥
वने कथंचित्तदनुकूपालुश्रीकृष्णपादाब्जयुगेरतेयं ॥ २५ ॥

दुष्टबुद्धिः—मे कार्यसिद्धिरभवत् ।

हृदि स्थितोस्तंभयादुरस्तो निर्गत्यगर्भस्तुअलक्षितोऽभूत् ॥
एकेनहस्तेन जनान्समन्तान्सांत्वंविकुर्वन्निवनीलपौत्रः ॥ २६ ॥

आकाशेगायते ।

वनेऽवतारस्त्वपरोनृसिंहो हिरण्यदैत्यात्सचताडितोऽभूत् ॥
अयंतुदैत्येंद्रदुरात्मनाहि बाळावतीगर्भमयश्चएषः ॥ २७ ॥

दुष्टबुद्धिः—अनयाप्रवृत्यानिर्भिन्नं मेहृदयं । सैनिकः । रेरेबुधक एनंहता-जातइतियद्गीयते तत्सत्यं । बुधकः । रेसैनिकसत्यंकिंतु नृसिंहदेवसदृशोऽयमिति कथं युज्यतेयतोनरसिंहस्तत्क्षणे पादाहस्तद्वक्षोव्यदारयत अयंन ।

सैनिकः—तस्मादप्ययं श्लाघ्यतमः पराक्रमी दृश्यते । पश्य ।

देवःसोऽपि महाकृतिं सुरिपोर्वक्षस्थलंदारितुं ।
स्तंभान्निर्गतभीममर्जनयुतो बालोप्ययंदारयन् ॥
यत्नादेवनिकेतने किमुनखैर्नाम्नैवचित्रंनहि ।
कुर्वन्शांतिमसौसतः करतलादम्माद्वनेदर्शयन् ॥ २८ ॥

बुधकः—सर्वसत्यंकिंतु अत्रप्रल्हादः कः । सैनिकः । सेनापतिः ।

बुधकः—कथं सेनापतिं तेनहतं जानन्नपिविरराम ।

सैनिकः—अस्माकंदेवः पौष्पसेनस्तद्वक्षो भित्वापश्यन् अस्याप्यधुना पापा-निपूर्णानि नेतिविरराम । योदेवस्य मातृर्हंतास्तीति विज्ञायमातृर्महंतु अस्यपापानि पूर्णानिभवंति ततोएनंहनिष्यामीति तत्याज ।

दुष्टबुद्धिः—किमपिजल्पंत्येते । मेशत्रुर्यदि जातश्चेत्कथमलक्षितः ।

पश्यसैनिकरविस्तुमद्भ्यात् धावतीतिममभासते वद ॥


त्यक्तखःस्नपति सिंधुपाथसि बाणरक्तहृदयोविलज्जितः ॥ २९ ॥

वयंस्वनगरं गत्वाराज्ञोवधूशतं हत्वसुखिनोभवाम । सैनिककिमत्र जल्पनेन । इतोरथमनाय ।

नगरंप्रतिगम्याशुहत्वातस्य वधूशतं ॥

पत्न्यासमंराज्यसौख्यं भुंजन्पुत्रायदीयते ॥ ३० ॥

सर्वेतथास्त्विति रथमानयंति । दुष्टबुद्धिः । गच्छामपुरंप्रति इदानीमिति सैनिकैः सहनिष्क्रांतः । निष्क्रांताः सर्वे ॥ इतितृतीयोंकः ॥



अथ चतुर्थोंकः ।



ततःप्रविशतिशतधन्वनामा मुनिः ।

मुनिः—इतस्ततः परिक्रामन् । सखेदं निश्वस्य । अहंदुर्दैवादेकः पुत्रो उत्पन्नोमृतश्च । किंकरोमि । देवार्चनाय पुष्पाण्यानयितुंयामः । किं दुःखेन ॥ (दक्षिणाक्षिविस्फुरति ।) अये दक्षिणाक्षिस्पंदनंमेसुखं यच्छति । किंचिद्गत्वाएतद्वनं पुष्पाणितावदवचिनोमि । इतिपुष्पावचयं नाटयति । किंचिद्गत्वा । अयेशिशोरार्तश्वरः श्रूयते । किंचिदार्तस्वराभिमुखंगत्वा । शिशुंदृष्ट्वा । मय्यद्यदेवेन प्रसादः कृतः । पौष्पसेनिरिवायं भाति ॥

पुष्पसेनतनयःकृपार्णवो हस्तजातइवभाति तेजसा ॥
कृष्णपादसरसीरुहाटवीसक्तहृच्चसुतनुर्वनालयः ॥ १ ॥

पार्श्वतः (विलोक्य । ससंभ्रमं) कथमियंबाळावती ईदृशामवस्थांप्राप्ता । अथवालंसंदेहेन । इयंगर्भिणी किंचित्कार्यवशाद्गहनंप्राप्ता भवेदत्रश्वापदैर्घातिता सतीपतिता । अयंच गर्भाशयान्निर्गतः भवत्वेनंगृहीत्वा रक्षामीतिंतं गृण्हाति । गृहीत्वातत्करंविलोक्य पुष्पसनतनयोऽयमिति किमत्रसंदेहेन । तथाहि ।

शंखचक्रकजछत्रचामरचित्रमत्तगजवाजिसंयुतः ॥
सिंधुतीरवलयांकितांभुव हस्तएवपृथुकस्यरक्षति ॥ २ ॥

(विचिंत्य । आः ज्ञातं ।) पुरैकादशीदिनेगहनेऽत्रानीय दुष्टबुद्धिर्बाळावतीमहन्यत्तद्वधूशतमपीति श्रुतवानास्मि । तेनैवदुरात्मनेदंकर्मकृतं स्यात् । भवत्वेनंरक्षामीति स्वग्रहंगच्छंति । ग्रहसमीपमागत्य । अयेप्रिये शीघ्रमागच्छ २ ततः प्रविशतितद्भर्या ।

भार्या----आर्यपुत्रइयमस्मि । आज्ञापयत्वार्यपुत्रः

मुनिः—प्रियेऽद्यहारिणाऽनुग्रहःकृतः ।

प्रिया—कोऽनुग्रहःमत्पुत्रमरणमेववा । मुनिः । तत्पुत्रशोकं विस्मर । एनंपश्यबालकमिति तत्करेन्यस्यति । पश्य ।

प्रियेऽद्यपुत्रो मयिविद्धिएनं प्रेम्णातनूजंसुतरां सुपाहि ॥
तत्कामस्वादूदकपूरितौचकुचौ सदापाययबालमस्य ॥ ३ ॥

प्रिया---भवत्वेनंपालयामि । कस्यसूनुरयं कस्थितः ।

मुनि---(सपरिहासं ।) ममायंसूनुः पुनः कस्यवर्तते ।

प्रिया----सत्यंकथयत्वार्यपुत्रः मुनिः । त्वमेवजानासि चेद्विध्यैनंनोच्यते

प्रिया—

आकारमाकृतिंरूपमवलोक्यास्य वीर्यतः ॥
उत्पन्नःपुष्पसेनस्य महिष्यामितिकथ्यते ॥ ४ ॥

मुनिः—साधुसाधुसम्यग्ज्ञानं तव । तस्यैवायंपुत्रः सत्यं । एनंपालय । प्रिया । पालयाम्येनमिति निष्क्रांता ।

मुनिः—वयमपिगच्छामइतिनिष्क्रांतः । ततःप्रविशतिराक्षसीराक्षसश्च ।

राक्षसः—प्रियेक्व गच्छाव ।

राक्षसी—रुधिरप्रियतांअटवीं यत्रबाळावतीमृतासेनापतिश्चमृतस्तयोः शोणितंपातुं । राक्षसः । ससंभ्रमं । प्रियेनपातव्यं प्रियेनपातव्यं मातुः क्षतजं । तथाहि ।

बाळावत्या जगन्मातुस्तस्य सेनापतेरपि ॥
रक्तंनपिबहे कांते इदृशीच्छांनकारयेत् ॥ ५ ॥

राक्षसी—नहि नहि तस्यारक्तंपिबाम्येव । राक्षसः । (सक्रोधं ।) अनभिज्ञेकुतस्ते दुष्टबुद्धिरगता ।

राक्षसी—जन्मतः । राक्षसः । सादुष्टबुद्धिर्नश्यतु ।

राक्षसी—कथं नश्यत्यधुनायदा पुष्पसेनतनयोऽत्रागत्यसर्वेषां दुष्टबुद्धिघातयतितदामे दुष्टबुद्धिर्नश्यति । तथाहि ।

दुष्टबुद्धिविनाशाय दीक्षितोनः पतिर्नृपः ॥
इदंस्वपुरमागत्य दुष्टबुद्धिंहनिष्यति ॥ ६ ॥

(नेपथ्ये ।) कःपुरमिदमागत्य मयिजीवतिमज्जनकं दुष्टबुद्धिंहानिष्याति ।

राक्षसः—(ससंभ्रमं ।) नेपथ्याभिमुखवलोक्य प्रियेत्वंकिमपिजल्पासि । एषदुष्टोदुष्टबुद्धिं हनिष्यतीतिश्रुण्वन्क्रुद्धस्तत्तनयोऽत्रागत्य त्वांहानिष्याति कथं करोषीदानीं ।

राक्षसी—यदुक्तंतत्सत्यमेवकिमर्थं मांहनिष्यति । पुनरपितदेवपठामि किं करोतिकरोत्विति तदेवपठति । दुष्टबुद्धिविनाशायेति ।

ततःप्रविशतितामसनामको दुष्टबुद्धितनयःक्रुद्धः ।

तामसः—कः पुरमिदमिति पूर्वोक्तंपठति । विधवेकिमेवं जल्पसिनयुक्तमत्रैवंजल्पनं । उभौ । भीतौ ।

तामसः—द्वावपिकदानएवं वक्तव्यं ।

राक्षसी—युक्तमेवोक्तंमया । दुष्टबुद्धिं सर्वेषांनाशायदीक्षितो नोऽस्मकंपतिः प्रभुर्दुष्टबुद्धिर्बाहिर्देशादागत्येदं पुरंहनिष्यतीत्युक्तंभवताऽन्यथैव ज्ञातं किं करोमि ।

तामसः—एवंवा । राक्षसी । अथकिं ।

तामसः—एवंभवत्विति निष्क्रांतः ।

राक्षसः—प्रियेनवक्तव्यं ईदृशंवचनं ।

राक्षसी—एषकिंकरोतिएनं तज्जनकं हंतापुष्पसेनमूनुर्वर्धते । तथाहि ।

शतधन्वसन्मुनिमहाभवनेरतःसोहत्वा रणेरिपुममुं सुतमस्यवीरः ॥
निष्कंटकांभुवमिमां प्रतिपालयन्स्वान्रक्षत्यतो सुखविशिष्टप्रजाभवंति ॥ ७ ॥

कदाश्रुतमिदं वृत्तांतं ।

राक्षसी—यदा आकाशवाणीएनं दुष्टबुद्धिंहंताजात इत्यभवत् । तदैवश्रुतं । अतशीघ्रमेनंहनिष्यति एतद्बधिरमेवापिबामः । इतिनिष्क्रांतौ ।

ततः प्रविशते शतधन्वशिष्यः ।

शिष्यः—विद्याशिक्षणवेलागता । अधुनागत्वापिविद्यामुपदिशति वानवा । अहमपिकिंकरोमि ह्यःस्वसुतनामकरणं चकारसगुरुः । रेरोशिष्य रामभट्टमाह्वयकृष्टभट्टमाह्वयेति निद्राभंगएवमेऽभूत् । अधुनाकिंचिन्निद्रांप्राप्तेमायिवेलाऽतिक्रांता । साशिशुरपि रूपवान् राजलक्षणयुतः । शतधन्वगुरुरपि एवंमत्वाशिशुं शांतहृदयोऽयमिति नाम्नाऽऽह्वयत् । किमिति ।

असौबालोऽत्यंतं शठमतिपदाताडितनुः ।
पुराऽभूच्छांतोयं शठमतिशैरर्घातितसुतं ॥
उस्सेनामुख्यंशठंमातीरिपोःपापभरितं ।
हृदिज्ञात्वानामप्रशमहृदयश्चास्यकृतवान् ॥ ८ ॥

भवतुतमद्गृहमेव गच्छामीतिनिष्क्रांतः ।

ततःप्रविशतिशतधन्वमुनिःपश्चात्तत्सुतः शिष्यश्च ।

मुनिः—सुतमालोक्य । पुत्रक इतएहि । बालः । समीपमागत्य पादयोः पतति ।

मुनिः—तन्मूर्ध्निकरंन्यस्य । (चिरंजीव सम्राड्भव । पुनःसप्रेम ।) शिशुतंगृहीत्वांऽऽकेऽऽगोप्य बालषट्शास्त्राण्युल्लंघितानि ।

बालः—उल्लंघितःशट्शास्त्रमहार्णवो भवदनुग्रहात् ।

मुनिः—गाढमालिंग्य । पुत्रक अधुना किमिच्छासि ।

बालः—बाणविद्यां । मुनिः । अहो प्रकृतिर्दुस्त्यजेति सत्यं । भवतु बाल अस्त्रविद्यामुपादिशमि ।

शिष्यः—ज्ञानसमुद्रइवायंबालः । तथाहि ।

रहसिजनसमूहवाक्यदृष्ट्यादिपीडा ।
भवति नसगुरुर्नो ज्ञानसिंधुंमयैनं ॥
उपदिशतियथैषतत्क्षणं लब्धविद्यो ।
भवति सह अहंनविस्मितोमां विलोक्य ॥ ९ ॥

गुरुः—रेरेशिष्यवनं गत्वाकीचकमानीयधनुः कृत्वासमैदेहि ।

शिष्यः—गुरोभवतु तथाकरोमीतिइतस्ततः परिक्रामन् । (स्वगतं ।) गुरोरस्य पीडामेवव्हीवर्तते तदानयइदमानयेति । तथापिगुरोर्वचनं नोल्लंघयेत् । (प्रकाशं ।) गुरोतथाकरोमीति निष्क्रांतः ।

मुनिः—बालधनुगृहीत्वा क्वगच्छसि ।

बालः—मृगयायैजगांतियये दुष्टबुद्धयस्तान्हंतुंगच्छामि । तथाहि ।

ताते शयोभुविमदांधरिपुश्च दुष्टोयोवर्धतेयमरतंधनुषा करोमि ॥
तंतंरणेस्वजनरक्षणमेव कृत्वात्वांनंदयामिजननीं पितरंहिविद्धि ॥ १० ॥

मुनिः—बालभवत्वैनामुत्तरां दिशंविनागच्छ । बालः । तथेतितातेनसहनिष्क्रांतः ।

ततः प्रविशति दुष्टबुद्धिः ।

दुष्टबुद्धिः—इदानींनिष्कंटका भूरासीत् । वधूंशतंहतं तथा बाळावतीहतासुखं भुज्यतेमयेदानीं ।

ततः प्रविशतिकमला ।

कमला—जयतु जयतु तातः ।

दुष्टबुद्धिः—विलोक्यसुता प्राप्ता । वत्सेऽद्यदुर्निमित्तानि बहून्यासन् । सुता । किंकिमासीत् ।

दुष्टबुद्धिः—शृणु ।

यदा बाहेर्देशमुपागतोऽहं तदैववामाक्षिभुजश्च वामः ॥
वत्सेऽस्फुरद्दक्षिणतो बिडालोयातस्ततो राज्यमिदंहियाति ॥ ११ ॥

कमला—शांतंपापं शांतंपापं प्रतिहतममंगलं । ततेराज्यमिदं स्थिरंकर्तुं मयावरोलब्धः ।

दुष्टबुद्धिः—कस्मात् । सुता । इंद्रात् ।

दुष्टबुद्धिः—किमिति ।

सुता—जेतुमशक्यावेति ।

दुष्टबुद्धिः—कौ ।

सुता—पयोधरौ । दुष्टबुद्धिः । सर्वंविस्तराद्ब्रूहि ।

सुता—सर्वं कथयामि । यदात्वंबाळावतीं तवधूंशतंहत्वा राज्यपालनासक्तस्तदाऽहंतातराज्यंस्थिरभवंत्विति इंद्रसेवानिरता ।

दुष्टबुद्धिः—(सहर्षं ।) ततस्ततः । सुता । ततोनिरंतरसेवासक्तां मां विलोक्येंद्रः प्रादुरासीत् ।

दुष्टबुद्धिः—ततस्ततः ।

सुता । ततस्त्वच्छेवया संतुष्टोऽस्मिवरंवृणीष्वेति बभाषे ।

दुष्टबुद्धिः—ततस्ततः । सुता । ततोऽहंदीनवाचा देवेंद्रमत्तातस्य स्थिरराज्यंयथाभवति तथामेवरं देहीत्ययाचं ।

दुष्टबुद्धिः—ततस्ततः । सुता । ततः संतुष्टमनसेंद्रेण सुभगे एतौमेघौ केनापिजेतुमशक्यौ । ग्रहाणैताभ्यां तेजनकस्यास्थिरराज्यं भवत्वितिमेवरोदत्तः ।

दुष्टबुद्धिः—ततस्ततः । सुता । जगतिमे कोप्येतौजेष्यति चेत्कथमित्यपृच्छंतस्मै ।

दुष्टबुद्धिः—साधु २ पृष्टंत्वया । ततस्ततः ।

सुता । ततोदेवेंद्रोएमेयौनौ जेतानास्त्येवयः पयोधरावेतौ जेष्यतिसएवत्वत्पयोधरावपि जित्वासबंधुंतेतातंच स्थिरराज्यंभुंक्तेहति ।

दुष्टबुद्धिः—ससंभ्रमं । मेराज्यं परःस्वाधीनंभवति किं स्थिरं न ।

सुता—नहि २ तेनएवं कथितं । पश्य ।

दत्तंतेसुभगेपयोधरयुगं जेतामहीपालक ।
स्त्वत्तातस्य विराज्यमिंद्रपदवीं राज्यंनरोयस्थिरं ॥
भुंक्तेविद्धिविपीनकौ कुचघटौगृण्हन्पतिस्त्वामिति ।
सोवीरस्तवतस्य भक्तिवशतस्तस्मै प्रयच्छेत्परं ॥ १२ ॥

दुष्टबुद्धिः—साधु २ वत्से सुवरोलब्धोइंद्रादपि । भवतु स्वगृहंगच्छ ।

सुता—तथाभवत्विति निष्क्रांता ।

दुष्टबुद्धिः—अधुनाचिंतापिकमलावतीभाषणेन दूरगामे । भवतुभूमिं पालयामि । इतिनिष्क्रांतः ।

ततः प्रविशति शतधन्वमुनिः ।

मुनिः—अद्यबालोमृगयायै गतोनायातः । दिशंकांगतः स्यात् ।

(नेपथ्ये) बालशांतहृदयतेहस्तगतौ सिंहगजौसृज । मुनिःश्रुत्वा । नेपथ्याभिमुखमवलोक्य । अयेमद्भार्यया निवार्यमाणोऽऽगतः सूनुः । तथाहि ।

करतलधृतमत्तकेसरींद्रस्त्वरिततरं जननीनिवार्यमाणः ॥
शरणगतगजेंद्रमृत्युनाशकृतिपटुवामकराग्रभीमहस्तिः ॥ १३ ॥

ततः प्रविशति जनन्यातौ सृजसृजेतिनिवार्यमाणस्तयासह शांतहृदयः ।

माता—वत्सशांतहृदयतौ सृजान्यथात्वां तौहानिष्यतः ।

मुनिः—ससंभ्रमं । बालवत्स्वपरं दीयतेविहर्तुं तौत्यज । बालः एनंमृगेंद्रंहत्वागजं त्यजामि । यन्निरपराधिनंगजं मृगेंद्रोहानिष्यति । तदयमविचारीकिमनेन ।

मुनिः—वत्सत्वंशांतहृदयेति कृतनामधेयोऽस्येतत्कथं युज्यतेत्वयि । बालः । दंडसमये तीक्ष्णएवभवितव्यं ।

मुनिः—वत्समुंचसिंहं ।

बालः—सिंहजृंभस्वदंतान् पश्यामि । नचेत्त्वां ताडयामि ।

मुनिः—नयुक्तमस्य हननं । माता । वत्समुंचैनं ।

मुनिः । यद्ययंमुनिपुत्रश्चेन्मुंचत्येनं राजपुत्राऽयं कथंमुंचति । वत्समुंच मृगेंद्रगजौच ।

बालः—सिंह कदापिनैवं कार्यंगच्छेतितं बलात्क्षिपति । गजेंद्रंमुंचति ।

मुनिः—वत्सउत्तरांदिशंविनागच्छ । भवत्वधुनाभोजनाय चर । इति ताभ्यांसह निष्क्रांतः ।

ततः प्रविशतिदुष्टबुद्धिः ।

दुष्टबुद्धिः—इतस्ततः परिक्रामन् । कःकोऽत्र भोः ।

प्रविश्यदौवारिकः—दौवारिकः । जयतु २ देवः ।

दुष्टबुद्धिः—(सगर्वं ।) रेरेपुरुषकोऽपि दुष्टबुद्धिरर्थतोऽप्यस्तीत्याह किं ।

दौवारिकः—नोच्यते तथाकेनापि ।

दुष्टबुद्धिः—मेराष्ट्रेकोऽप्यपघातं न करोतिवा ।

(नेपथ्ये ।) करोत्येव ।

दुष्टबुद्धिः—नेपथ्याभिमुखमवलोक्य । कर्णदत्वा । कः ।

नेपथ्ये । एषदुष्टबुद्धिः ।

दुष्टबुद्धिः—आः किमेवंजल्पसि ।

ततः पटाक्षेपेणसैनिकः ससंभ्रमः प्रविशति ।

दुष्टबुद्धिः—सैनिकंविलोक्यं । किंरेकिंजल्पासि ।

सैनिकः । देवकथयामि श्रूयतां ।

मदोन्मत्तोऽत्यंतंशठमतिरसौ हंतिमनुजान् ।
हतंदुष्टेनाशुहननिरतः कोनुभवति ॥
अनेनस्त्रीणांचशतमिदममुं मेरणमुखे ।
मुनेः पुत्रेणैषहतइति विनाविद्धिजननीं ॥ १४ ॥

दुष्टबुद्धिः—आः ममांतकोमुनिपुत्रो भवतिकिं ।

सैनिकः—नहि २ गजमेनंमत्तं त्वांविनाकोऽपि नहंतीत्युक्तंमुनेः पुत्रोपि भवताविपरीतमेवसंभावितं ।

दुष्टबुद्धिः—एवंवा । तर्हिकिमेवंहंत्ययंहंत्ययं मामितिजल्पासि ।

सैनिकः—वीर्याणवेत्वयिमे कस्माद्भयंन । भवद्भिस्तन्मदनाशः क्रियतां ।

दुष्टबुद्धिः—चरवयमपितन्मदनाशाय गच्छामइतिनिष्क्रम्य पुनःप्रविशति ससैन्योदुष्टबुद्धिः पश्चाद्गर्जन्मत्तोगजश्च ।

दुष्टबुद्धिः—मयाप्यसौसैनिकनहन्यते किंकरोमिभवतूर्ध्वदेशे स्थित्वातावदेनं-पश्यामि । इत्यूर्ध्वदेशमुपाश्रितः ।

ततः प्रविशति । ब्रह्मचारीशतधन्वपुत्रोधनुर्भृच्छांतहृदयः ।

शांतहृदयः—अद्यमृगयायै एतद्दिशंविनागच्छामाकिं एतद्दिशं गच्छाम । यतस्तातोमेकथितवान् एतद्दिशमुत्तरां विनाशगच्छेति । शिशुमेनंघ्नंतीति

स्वापदाअभिप्रायेणनयाहीति कथितवान् । तदाप्रभृत्येवयदाहंबाणविद्यामुपदिशसि चेद्गृह्यतेमयेत्युक्तवान् तदानवमवर्षी तदैवमयाउपनयनंस्वीकृतं । इदानीमेकविंशतिवार्षिकोऽहं । तदस्तु । एतद्दिशमेव गच्छामि । किंचिद्गत्वा । अयेक्रूरतमामिदमरण्यं तथाहि ।

मत्तसिंहगजवाजिवानरव्याघ्रदुष्टमतियुक्तसंयुतं ॥
हास्यकर्मगजशक्तिसूकरस्वावृकागतनरांतकायुतं ॥ १५ ॥

ईदृशमिदंवनंअतएवकथितवान् मत्तातोएतद्दिशंविना गच्छेति । भवतु बाणैमयैतेहानिप्यंते । इतिसशरंधनुरादत्ते । (सिंहादयोएनंशांतहृदयं जिघांसयाऽऽगच्छंति ।

शांतहृदयः——बाणैस्तान्हन्यते । बलिष्ठसिंहोधावन् आगतः ।

शांतहृदयः——

एषोऽपिसिंहोमुनिरेव साक्षात्स्वकांतितुच्छीकृतभानुहस्तः ॥
तथापिएतद्धननेन पापंनायाति मांहंतिनिरुद्यमश्चेत् ॥ १६ ॥

(इतिबाणवृष्टिंकरोति ।) सिंहोपितान्बाणान्तुंडे परिगृह्यसमीपमागत्य शांतहृदययज्ञोपवीतंगृण्हाति ।

शांतहृदयः——यज्ञोपवीतंतृटित्वा तमेकशरेण हंति ।

शराहतः सिंहवपुः सशीघ्रं मुत्क्षाक्षणोदिव्यवपुश्चगृण्हन् ॥
मुनिर्बभूवाखिलदोषमुक्तो एनंबभाषेमुनिपुत्रमेवं ॥ १७ ॥

मुनिपुत्रवरंवृणीष्व प्रसन्नोऽस्मित्वया पापन्मुक्तोऽहं ।

शांतहृदयः——तंन्नत्वाभवान् कः ।

मुनिः । मेपूर्ववृत्तांतं शृणु । चित्रनेमिनामकोऽहंराजा कदाचिन्मृगयोद्देशेनश्रमंस्तत्रतत्र मृगानुसारीकस्यचिन्मुनिनिकटेंऽतर्हितो मृगइतिंमुनिमववलेपभरादुर्भाषणान्युक्तानि तच्छ्रुत्वामुनिःक्रुद्धःसन्मांशशाप । तथाहि ।

रेरेदुष्टमदांधकिंममुधादुर्भाषणं व्याहरन् ।
राजासन्नपिहंतुमिच्छसि मृगात्सिंहत्वमेहीतिमां ॥
स्वामिन्पाहिसहस्वमे मुनिवरअज्ञानमूलादिदं ।
चोक्तंतत्तदनुस्वशापनिवृत्तिमां प्रत्यवादीन्मुनिः ॥ १८ ॥

यदापुष्पसेनतनयः शांतहृदयस्त्वांशरैस्ताडयतितदामुक्तो भूत्वाराजर्षिभविष्यसे । तस्मान्मुक्तोऽहं ।

शांतहृदयः—यज्ञोपवीतंमेकिमर्थंतृटितं ।

राजर्षिः—तच्चकथ्यते ।

तृटितंचब्रह्मसूत्रं तवविवाहकर्मभवतीति ॥
अतःकृताहिविधिरिति गोदाननामकापुत्रस्त्वस्तीति ॥ १९ ॥

भवतुगच्छाम तंमुनिंप्रति । इतिनिष्क्रांतः ।

शांतहृदयः—सदृष्टिक्षेपं । अहोऽत्रकिंघोषः श्रूयते । समीपंगच्छामि इतिपरिक्रामति ।

सैनिकः—भो इतआगच्छध्वं । गजःखलु मदोन्मत्तः ।

दुष्टबुद्धिः—बहिःपीडाबहिरेव निष्कामतु ।

शांतहृदयः—श्रुत्वागजसमीपमागत्य ।

अयंखलुगजो महाप्रलयमेघधारासमं ।
विघोषमनुकुर्वतिमदजलंविमुंचन्दिशः ॥
दुरात्ममनुजानसौसपदिहंतिमत्तोप्यतो ।
इदंहिनगरंदयापरवशंमयाज्ञायते ॥ २० ॥

भवतु उन्नतभूमिस्थमनुसरामि । इतिदुष्टबुद्धिनिकटमागच्छति ।

दुष्टबुद्धिः—कोऽयंस्यात् । भवतुपृच्छामि तावदेनं । कस्त्वं ।

शांतहृदयः—हंता । दुष्टबुद्धिः । कान्नरान् ।

शांतहृदयः—दुष्टबुद्धीन् ।

दुष्टबुद्धिः—विद्याकाते ।

शांतहृदयः—शस्त्रविद्येतिविद्धि ।

दुष्टबुद्धिः—पुत्रःकस्य ।

शांतहृदयः—मांमहर्षेःसुतश्च । दुष्टबुद्धिः । व्यर्थाविद्ये ।

शांतहृदयः—त्यास्तिशस्त्रंगृहाण ॥ २१ ॥

दुष्टबुद्धिः—एनंमारयासिचेत्तवशस्त्रग्रहणं सफलं ।

शांतहृदयः—गजमंनंहंतात्रकोनास्ति तवापितन्मरणं असाध्वंवा ।

दुष्टबुद्धिः—वयंनिर्बलाएव । अत्रपराक्रमं दर्शय ।

शांतहृदयः—धनुन्यस्य ।

कृतांतरूपोप्यकृतांतरूपो बलेनहीनोप्यतिशक्तिमान्सः ॥
निष्क्रुद्धदेहोप्यति क्रुद्धदेहः समीपमागान्मदमत्तहस्ति ॥ २२ ॥

शुंडांप्रगृह्यकराग्रेणतंभ्रामयन्कृतांतवसतिंप्रेषयाम ।

दुष्टबुद्धिः—(सविस्मयं ।) (आत्मगतं ।) अयंपराक्रमीमयाहंतुमसाध्योदृश्यते । अस्यमरणोपायः कथमपिकर्तव्य एव । भवतुतावदेनंवक्ष्ये । (प्रकाशं ।) शांतहृदयतेपाराक्रमेण प्रीतोस्मि । सांप्रतंमेपुत्र्यैपत्रनयनंकर्म क्रियतेवा ।

शांतहृदयः—क्रियत इतिपत्रमादत्ते ।

दुष्टबुद्धिः—रेरेसैनिकएतस्यमत्पुत्र्याग्रहं प्रदर्श्यशीघ्रमागच्छ ।

सैनिकः—अथकिं । दुष्टबुद्धिः । वयमपिगच्छामइति ससैन्योनिष्क्रांतः ।

शांतहृदयः—सैनिकइयंरम्यापुरीकस्य ।

सैनिकः—इयंपुष्पावतीपुरी । पुष्पसेनइति तेपित्रापालिता त्वत्पिताविषमज्वरपीडितो यमलोकंगतः । तदनंतरमासौ दुष्टबुद्धिःमातरंमातृशतं हत्वाराज्यपालनसक्तस्त्वामिदानीं जिघांसयास्वपुत्र्यैपत्रंप्रेषितं स्यात् । तत्त्वंतंहत्वाराज्यपालनंकर्तव्यं ।

शांतहृदयः—एवंवा । किंचिद्गत्वाचूतसंघं दृष्ट्वा । अयेसैनिककस्येदं आम्रवृक्षसमीपस्थं ग्रहं ।

सैनिकः—तस्याः कमलायाग्रहमिदं ।

शांतहृदयः—अत्यानंदस्थानं । तथाहि ।

भ्रमरस्यात्रप्रवेशश्च कथमेवंभविष्यति ॥
बाहुल्यमधुसंपातुमेकोप्यत्र नदृश्यते ॥ २३ ॥

ततः प्रविशतिकमलाचेटीच ।

कमला—हंजेविशालप्रकाशोऽत्रमेंऽगेऽनंदकारीमीनध्वजविपाठानुत्पादयन् जालमार्गादपतत् । पश्यपश्य ।

शांतहृदयः—ग्रहमवलोक्य ।

मरकतमयशुद्धकांतिरम्याकृतिमहिलाजनदृश्यबिंबयुक्तं ॥
ग्रहमिदमवलोक्यमीनकेतुः शरहतकायमहोकरोतिमांहि ॥ २४ ॥

कमला——सखिपश्यावतावदेतत्प्रकाशं कस्यभवेदितिबहिरागत्य शांतहृदयंपश्यति ।

शांतहृदयः——

किमियंसुरसंदरीबभवेदथवा सूक्ष्मकटीविशोभिता ॥
भ्रुकुटीस्फुरणेनमे त्विातिमदनंवृद्धतमंविकुर्वती ॥ २५ ॥

सैनिकः——पुरासोमदत्ततनयां कालिंगराजोऽपहरन्तयामहचक्रीडे । तथाभूतांगर्भिणींसोमदत्तसुतः कुलकलंकामितिजिघांसयागहनेऽऽनीयतां जघान । तत्सुताएषा ।

शांतहृदयः——अस्यदुष्टबुद्धेः कथमुपलब्धा ।

सैनिकः——कदाचिन्मृगयोद्देशेनगतेऽस्मिन्नेनां पालयामीतितमोगुणबुद्धिरापि सत्वगुणबुद्धिरिवग्रहमानीयापालयत् । तदेषातस्य पुत्री । तस्याग्रहमिदं विश । अहमपिगच्छामीति निष्क्रांतः ।

शांतहृदयः——भवतु परस्त्रीअवर्णनीया । दुष्टपत्रमस्यै ददामि ।

कमला——हलाएषकोभवेत् अहमप्येनंरूपातिशयादेवं मन्ये । तथाहि

असावतीरूपवान् रतिर्विशोकयाचनैः ।
कपार्दचेतसागतो रतिंहिजाग्रतः स्मरः ॥
मदीयरूपनिंदितां विलोक्यबुद्धिमानपि ।
हरेणदृश्यतेसखितमेवयातिमे मनः ॥ २६ ॥

शांतहृदयः——किमिदं रूपमिमोहमुपगतः । पुनःसज्ञामुपलभ्य ।

पक्ष्मयुक्तनयनां समकुर्वन् पक्ष्महीननयनाविलज्जितुं ॥
रूपवत्यइतिगर्वजुषोऽलं गर्वनाशकृदिवानयाविधिः ॥ २७ ॥

इत्युपसृत्य । अत्रभवतिकमले । कमलापृच्छेनं तावत्कस्यपुत्रोऽयंकस्मादिहागतोऽसीति ।

चेटी——तथेति । भद्रस्वागततंव कस्यत्वंपुत्रःकस्मादिहागतो भवान् ।

शांतहृदयः——उपविश्य अहंशतधन्वपुत्रःकिंचित्कार्यवशात्प्रेषितोऽस्मि दुष्टबुद्धिनाएतत्प त्रिकांगृहीत्वागच्छेति अतोपत्रिकां गृहाण । चेटीगृहीत्वा । कमलेपत्रिकेयंग्रहाण । इति अर्पयति । कमला । गृहीत्वावाचयति ॥ चि. कुं. कमलेत्वं अरण्यादानीयपालिता । इदानीं आगतस्यास्यविक्रमसौंदर्यादि

गुणैर्विशोभिनं स्वाधीनाभ्यांपयोधराभ्यां जित्वैनंतातवसतिं प्रेषय । तथाहि ।

कुरुकुसुमशरातिपुष्टकाभ्यां कुसुमशरेण शरैश्चपूर्णकाभ्यां ॥
शुभगुणयुतमेनमाशुजित्वा पितृवसतिंसुदृशंपयोधराभ्यां ॥ २८ ॥

इतितातेनलिखितं । हलंतातेनापिशुभगुणयुतस्य पाणिग्रहणंकुर्विति ।

चेटी । अनेनसह । इंद्रदत्तपयाधराभ्याप्रयुध्यैतं स्वीकरु ।

कमला—जनांतिकं । ममप्रतिज्ञानुसारेण पयोधराभ्याप्रयुध्यमयापराजितोप्ययं अनेनैवसहानंगयुद्धंकरोमि । प्रकाशं । हलाद्रुतंपयःपूर्णौघटावानय ।

चेटी—तथेतिनिष्क्रम्य घटावानयति ।

शांतहृदयः—(आत्मगतं ।) अहोयुद्धात्पूर्वंजल पूर्णघटानयनं सुनिमित्तानिकथयति ।

चेटी—सखि आनीतः पयोधरः । तेनप्रयुद्धस्वेति अर्पयति ।

शांतहृदयः—प्रयुध्यतांराजपुत्रि । इतिसर्मापमागच्छति ।

कमला—सरोषं । घटाभ्यांताडयति ।

शांतहृदयः—सचिंतमात्मगतं ।

यथाऽनयाताडितहेमकुंभो ममेदृशंकोमलहस्तपद्मं ॥
प्राप्यातिपीडांकुरुते तथास्या वक्षोजकुंभोममवक्षसीव ॥ २९ ॥

कमला । सरभसं । गृहीत्वाघटौचेट्यैसंज्ञां ददाति ।

शांतहृदयः—चेटींनिवार्य । घटौगृण्हातिगाढं ।

कमला—हा इंद्रशचीकलत्रायंकोपि त्वयादत्तौघटौ मुनिपुत्रोविजिग्ये । मांत्रायस्व २ ।

चेटी । समुनिपुत्रो रक्षतित्वां ।

ततः प्रविशत्याकाशयानेनससैन्यस्सवज्रःसहरिर्हरिः ।

इंद्रः—रेरेदुष्टात्मन्एवमेकाकिनींकन्यकांजित्वाजीवन्यास्यसि । इतितस्मिन्वज्रं क्षिपति ।

शांतहृदयः—प्रियेत्वकृतेइंद्रोविष्णुसहायो युद्धायोद्युक्तः । भवतुक्षणमेवशक्ररहितां भूमिंपश्यसि । इतिशरैर्हतितं ।

विष्णुः । (सस्मितं ।) रेरेशठहृदयचंडममचक्रंसहस्वेति क्षिपति ।

शांतहृदयः—(विहस्य ।) भोभोविष्णुयमप्रभृतयो क्षणमात्रंबाणवृष्टिंसहध्वमितिबाणवृष्टिंकरोति ।

विष्णुः । (सभयं ।)

चक्रंनष्टंभूपेनैव विष्णुंजित्वावज्रंशांतं ॥
शक्रत्वांभोभूपेनैव कालंजित्वाकन्यापापा ॥ ३० ॥

हेशक्रादिप्रभृतयो पलायनेनालं । ब्रह्माणंब्राह्मणांश्चास्यविवाहार्थं आव्हयागच्छेति ।

शक्रः—तथेतिसैन्येनसह निष्क्रांतः ।

विष्णुः—वत्स शांतहृदयप्रसेदिवानस्मि ।

शांतहृदयः—प्रणम्य । तवपितुरलंशश्वत्प्रेम्णाविना ममआगसां दिनेरात्रौसौदुत्वां विना कःशक्तः ।

ततः प्रविशंति पत्नीसहितशक्रभवब्रह्माणो लक्ष्मीश्च पश्चात्प्रविशति ।

विष्णुः—शुक्रपुण्याहवाचनायकन्यापक्षे ब्रह्मोपविशतु । अहंतुलक्ष्मीसहितोवरपक्षे उपविशामि । अस्यशांतहृदयस्यमंगलस्नानाय सदासीपार्वतीयुज्यतां । उभौउपविशतः ।

पार्वती—हलाशीघ्रमस्यस्नानाय हेमकुंभमानय ।

चेटी—तथेत्यानीयस्थिता ।

पार्वती । (सस्मितं ।) हलाकिंपश्यसि ।

उरोजकांत्वासदृशः किमेषः सुवर्णकुंभःसखिमेदृढेन ॥
विचिंयतंत्र्यंबकरस्थकुंभास्थितासि किंदेहिसुवर्णकुंभं ॥ ३१ ॥

इतिबलाद्गृहीत्वातंस्नापयति ।

ततः प्रविशतिभीमभट्टादयोद्विजाः ।

विष्णुः—शीघ्रमानीयतांशांतहृदयः ।

पार्वती—सरभसं । वधूवरौस्नापयित्वाप्रसाधयित्वा चउपावेशयति ।

ब्रह्मा—गणपतिपूजाक्रियतां ।

महादेवः—किमर्थंगणपतिपूजासाक्षान्मंगलनिधौ नारायणेस्थितेकुतोवाविर्भविष्यंति विघ्नाः ।

विष्णुः—करितुंडपूजावाङ्निश्चयपुण्याहवाचनादि कृत्वाऽऽहशक्रब्राह्मणेभ्योदीयतां दक्षिणा ।

शक्रः—तथाकरोति ।

भवः——उपविश्यतांभोजनाय ।
ब्राह्मणाः सर्वेउपविशंति ।
पार्वती——वधूवरौपरस्परं नामगृण्हीतां ।
कृष्णभट्टः——रामभट्टउच्यतांश्लोकः ।
रामभट्टः——

समस्तदोषाकरनाशकोपि स्वयंहि दोषाकरमौलिरेषः ॥
भवोरगंभक्तजनानुयातं हंतापितत्सर्पकृंतानुपृष्टः ॥ ३२ ॥

शंभोहरहरमहादेव ।
पार्वती——वधूवरावन्योन्यं नामगृण्हीतां । अलमलंव्रीडया ।
शांतहृदयः——

दुष्टबुद्धितनयापिसुबुद्धी स्वर्गलोकललनाजयरूपा ॥
लीलयोरसिपयोधारयुक्ता सेतिवित्तकमलांममलोकाः ॥ ३३ ॥

कृष्णः——भीमभट्टत्वमप्येकं श्लोकंपठय ।
भीमभट्टः——

कस्त्वंश्रीमान्मृगयक्रृणिकान्श्रीपतिर्विद्धिनस्त्वं ।
कृष्टातेनशठमतिसुताकायमत्राहठाच्छ्रीः ॥
मुग्धेकांतेक्षितिपतिरहंविद्धिनस्त्वंमहीशः ।
कृष्टासापिप्रतिवचनजडःपातुनःश्रीपतिःसः ॥ ३४ ॥

लक्ष्मीः——कमलेपत्युर्नामग्रहणंकुरु ।
कमला——

येमेंद्रदंडधरस्वेतत्वहारिदधिमाधुर्यहारिकिरण-
श्रीशेषुयुद्धमखपृष्ठं प्रदर्श्यगतिहव्यंभजस्सुघटितं ॥
तैर्दत्तशांतहृदवर्णैरुपायनसुकर्मतिनामपदयोर्यस्मै
यमोऽपिभयभीतार्धनामयुगवर्णैकदानभिषजः ॥ ३५ ॥
स्वस्थोऽभवद्यस्ययवर्णमेलना- ।
द्यद्वीर्यमाधुर्यवचःसुकीर्तिभिः ॥
पूर्णाद्यभूत्तस्यमनोजशांतका ।
कांतश्चजानीथसमस्तसज्जनाः ॥ ३६ ॥

विष्णुः---वयंसर्वेगच्छामहातिथधूवरौ विनानिष्क्रांता : ।
शांतहृदयः---प्रियेचित्रमेतत् ।

त्रिनेत्रयुक्तोऽपिकथंमृगाक्षि गुप्तोंबरेणैववदेतिशैलः ॥
कुतोभयंतस्यसुधांशुमीतस्तत्रैवकस्तंघटयांचकार ॥ ३७ ॥
नपौर्णिमाचंद्रसुपीडितांगो । यथाऽष्टमीबाणसुधांशुमीतः ॥
तत्कारणंकिंनुवदेतिसुभ्रु । तत्पार्वतीतुंडपराजितत्वात् ॥ ३८ ॥

कांतेशतधन्वाश्रमंगच्छामि ।
प्रिया---आर्य नगव्यंतावत् ।
शांतहृदयः---तथेतितयासहनिष्क्रांतः । इतिनिष्क्रांताः सर्वे ।

इति चतुर्थोंकः ॥

अथ पंचमोंकः ।



ततः प्रविशतिदुष्टबुद्धिः सैनिकश्च ।

दुष्टबुद्धिः—सैनिकमंत्रनिर्मितः प्रेषितः सर्पः नाद्यापिप्राति निवृत्तः । तत्स प्रतंगत्वातद्वृत्तांतं ज्ञात्वाशीघ्रमागच्छ ।

सैनिकः—तथेतिनिष्क्रम्यपुनःप्रविशति ।

सैनिकः—जयतु २ महाराजः ।

दुष्टबुद्धिः—किंकिंवृत्तांतंतस्यदुरात्मनः सर्वंकथयाधुनाजीवतिवानवा ।

सैनिकः—अद्यापिजीवति ।

दुष्टबुद्धिः—तयोर्युद्धोनाभूत् ।

सैनिकः—अभूदेव ।

दुष्टबुद्धिः—कोयुद्धः ।

सैनिकः—अकाययुद्धः ।

दुष्टबुद्धिः—(स्वगतं ।) सातद्वशाभवितुं नार्हति । अकाययुद्धो नाम-बाणयुद्धोभवेत् । प्रकाशं । सैनिकयुद्धंवर्णय ।

सैनिकः—शृणोतुदेवः ।

नीविबंधनमसौपरिमुंचन्नालिलिंग दृढबाहुलताभ्यां ॥
तातहस्तलिखितेक्षणकोपमेप एवनुनुदेदृढसंगः ॥ १ ॥

दुष्टबुद्धिः—किंदुरात्मारंतुमारेभे ।

सैनिकः—नहि २ कथयामिसर्वं । पश्य ।

स्तस्याः पीनतमंपयोधरयुगं गृण्हन्पसह्यात्मनि ।
त्वस्मदेवकरद्वयेनकिमिदं वज्राद्दढंविद्यते ॥
पूर्वंमत्तगजेंद्रकुंभयुगलं चाब्रूत्स्वहस्तद्वया ।
नष्टंसंप्रतित्वत्पयोधरयुगाद्गीतौ करौमेजितौ ॥ २ ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—

पद्मासुतातेकुशलाविकृष्य । स्वकीयकौपीनपयोधरौसा ॥
करद्वयांत्तचसुवंचयित्वा । वृथांऽबरेणैवहठाद्रुरोध ॥ ३ ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—

कुचघटयुगलंप्रसह्यतस्याः । समधृतचोलप्रभापहास्यरत्नां ॥
अतिकठिननखैर्विदार यन्स । दृढतरमाशुप्रगृह्यसस्वजेतां ॥ ४ ॥

दुष्टबुद्धिः—(सरोषं ।) सदुरात्माकिंतांसस्वजे ।

सैनिकः—नहिनहि ।

दुष्टबुद्धिः—तर्हिकिमेवंतांसस्वजेसस्वजे इतिजल्पसि ।

सैनिकः—स्वगतं । अस्यपुरः विचार्यकिमपिभाषितव्यं नवेदितव्यामस्मै तद्वृत्तांतां । प्रकाशं । देवकथयामि ।

चंदनेनसमलंकृतदेहा । कुंकुमेनचपयाधरावपि ॥
वक्षसीवनृपतिंपुरःसुता । वंचितंकृतवतीविलिप्यते ॥ ५ ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—ततस्तेतनयादीनवाचाशक्रशक्र त्वयादत्तपयोधरावेषजित्वामामपिवशीकरोति त्रायस्वत्रायस्वेतिदयोपेतः शक्रः विष्ण्वादिनासमेतश्चिरतरं प्रयुध्य शांतहृदयंविजिग्ये ।

दुष्टबुद्धिः—(सहर्षं ।) ततस्ततः ।

सैनिकः—ततःशांतहृदयोपि भोभो शक्रादिसेनानायकाःबहुनाबाणवृष्टिपातेनकिमेकेनैवबाणेन सर्वान्निवारयामीतिशक्रततांड ।

दुष्टबुद्धिः—ससंभ्रमं । ततस्ततः ।

सैनिकः—तस्यैकबाणस्यतीक्ष्णतांकिंवदामि । पश्य ।

तन्व्यास्तातरिपोःकरावभिजितावित्येवगर्वासह- ।
स्त्वावाभ्यांनृपतेस्तलादिभिरसौशून्यस्तृतीयःकरः ॥
बाणोगर्वतमैकमेकमितितौ ह्यंगान्यशेषान्यपि ।
जित्वाहृद्ग्रहमाविवेशसुचिरद्वेषीसुतायाः क्रुधा ॥ ६ ॥

दुष्टबुद्धिः—ततस्ततः

सैनिकः—

तद्बुद्धसंभवमिदंचलघर्मतोयं । दृष्ट्वामरादृदिसविस्मयमानसाश्च ॥
मंदाकिनीकिमुद्यदाद्धरिराहुरेवं । प्रेम्णापयोधरयुगंश्रुतवंतएते ॥ ७ ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—

हताम्म्यंहसत्यंमहंमृतास्मि । पराजितास्मीतिवचास्युवाच ॥
अंगान्यशेषाणिचमारवाणै । र्विद्धानिपातुंममरक्षशक्तः ॥ ८ ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—

पराजितास्मीतिवचोनिशम्य । हठाद्गृहीत्वा वदनंचुचुंबे ॥
मृषाऽब्धिजातंपपुरेवदेवा । बिंबाधरेऽस्याद्यमृतंहिलब्धं ॥ ९ ॥

दुष्टबुद्धिः—सर्वथातनयांजग्राह

सैनिकः—अथकिं ।

दुष्टबुद्धिः—सरतिं केनप्रकारेण कृतवान् ।

सैनिकः—तांरतिमपिकथयामि । सलज्जं । शृणोतुदेवः ।

नैतत्पयोधरयुगंतवकिंतुतन्व्या ।
अत्यंतवर्तुलमहंह्यवलोक्यवक्ष्ये ॥
अस्त्याहचक्रमिहवेत्सिप्रियेयदित्वं ।
सत्यंवदेतिललनाकुचकुंभहस्तः ॥ १० ॥

दुष्टबुद्धिः—ततस्ततः ।

सैनिकः—

चंद्रंपृच्छयदात्थकांतामितिंतंचंद्रोऽयमूचेरुषा ।
पूर्वस्मिन्जननोपिचक्रयुगलमस्मान्नभीतंहिसत् ॥
अद्यापिस्तनतांविगाह्यममकिंवक्षस्थितंपीडयन् ।
त्वद्धस्तस्थितस्वार्धदेहनखरव्याजात्तुवाराजते ॥ ११ ॥

दुष्टबुद्धिः—अलमनयाकथया । तमेवहंतुंगच्छाव । इतिसैनिकेनसहनिष्क्रांतः । ततःप्रविशतिशतधन्वशिष्यः ।

शिष्यः—सखेदं । अद्यापिशांतहृदयोनायातः । दुरात्मनांकालोऽयं । केशवतस्मिन्निदानीमप्यनुग्रहंकुरु । सशांतहृदयः पुष्पसेनपुत्रोराजाभवितुंनार्हतिकिं । अथवा । तस्यदुष्टबुद्धेरेवभक्तिस्त्वयिशाश्वतीदृश्यते । तथाहि ।

निर्व्याजापदयुगलेतवाच्युतास्य ।
भक्तिर्नोममकिमुशाश्वतीप्रसीद ॥
तालूकाधिपतिरमुंद्विजौघशीर्षं ।
छित्वायज्जयतिशिलेतिमन्यतेत्वां ॥ १२ ॥

(सचिंतं ।) तद्वृत्तांतं पत्रलिखितंनज्ञातं । पत्रेकिमपिनदुस्तरंतदितिचतुर्थाक्षरण्येवलिखितानि । अहमपिगुरोराज्ञया मृगमाणोऽपितंनप्राप्तः ।

ततःप्रविशति सभार्यः ।

शतधन्वः—प्रियशांतहृदयःकगतःस्यात् ।

शिष्यः—गुरोअभिवादयेभवंतं ।

गुरुः—दीर्घायुर्भव ।

शिष्यप्रियः—शांतहृदयः कवर्तते ।

शिष्यः—तंनजाने । एषपत्रस्तस्मादागतः । मयातत्पत्रगतवृत्तांतंनज्ञातं ।

गुरूः—इतआनयतत्पत्रं ।

शिष्यः—आनयति ।

गुरुः—वाचयति । दुस्तरंतत् । प्रियेतन्नामादशघंटंमृगयांकृत्वामदागमनं अद्यदुस्तरामिति । पत्रगतंवृत्तांतंकुत्रचित्सिंहेन हिंसितोभवेत् । हावत्सशांतहृदय मममंदभाग्यस्यतातशब्दस्यावाच्यकस्य वाच्यकंकुर्वन्कगतः । इतिरोदिति । सर्वेमूर्च्छिताः ।

मुनिः—संज्ञामुपलभ्य । तथाहि ।

वत्सत्वयावनविहारवतांमृगाणां ।
मत्तेभकुंभपरिपाटनदक्षसिंहं ॥
हत्वापुरोंतकइतिस्वामिवाहमेवं ।
ज्ञातोऽस्मिकिंनुहरिणावनप्रेषणेन ॥ १२ ॥

प्रिया—हावत्सशांतहृदयमयारक्षितहृदयकासिगतः देहिमेप्रतिवचनं । इतिमूर्छति ।

शिष्यः—आर्यबुद्धिसागरस्यतस्यपत्रगतं वृत्तांतं अन्यदेवभवितव्यंममतुएवं भासते ।

गुरुः—किंमिति ।

शिष्यः—

दुष्टबुद्धिहननंमयातया ।
दुस्तरंतदितित्यक्तवानहं ॥
दुष्टबुद्धिसुतयापदकंज- ।
द्वयमिदंसुखशायिनमेव ॥ १३ ॥

गुरुः—सशांतहृदयः कदापिदुष्टबुद्धिहननंमयादुस्तरमितिनवयूक्तुमर्हति । एवंतद्भावोममभासते । तथाहि ।

दुष्टबुद्धिसुतयारममाण- ।
स्तच्चतुर्थहननेच्छुरहंतां ॥
रंजयन्मवदनुग्रहात्स्वयं ।
तत्सुखंह्यनुभवामियद्ग्रहे ॥ १४ ॥

(नेपथ्ये ।) (नेपथ्ये ।) अयमहंभोः ।

गुरुः—शिष्यज्ञायतांकिमेतत् ।

शिष्यः—निष्क्रम्यपुनःप्रविश्य । गुरोमुनिरागतः ।

ततःप्रविशतिमुनिवेषधारीतामसनामको दुष्टबुद्धितनयः ।

गुरुः—मुने अभिवादयेभवंतं ।

मुनिः—(आत्मगतं ।) एतान्वंचयतुमयमेवकालः । प्रकाशं । मुने भवान्नमस्कर्तुनार्हति ।

शतधन्वः—(ससंभ्रमं ।) मुनेकिमर्थं ।

मुनिः—शांतहृदयेत्वत्सुतेस्वर्गंगतेसति युष्मत्तोनादेयंनमस्कारादिकं । अतैवोपविशामि ।

शतधन्वः—नयुक्तंऋषिर्भवान् भूमावुपविशतुंआसनेउपविश । तथाहि

अहमागतंसपदिस्वागतेनरो ।
मनुजोवदेद्धविसएवयोग्यवान् ॥
नसहेदियंदिविबुधैश्चपठ्यते ।
भूमिःस्वयंधरणिसक्तपृष्ठंद्विजं ॥ १५ ॥

मुनिः—तथेति । उपविशति ।

शतधन्वः—मुनेसशांतहृदयः कथंहतःकेनहतःकथ्यतांसर्वं ।

मुनिः—इतोदुष्टबुद्धिनगरमेत्यतत्तनयामृद्ध्वा तंदुष्टबुद्धिर्जिघांसुःसमरभुवमागतः।

शतधन्वः—ततस्ततः।

मुनिः—ततःसदुष्टबुद्धिरपिशक्तेन तामसनामकेनसुतेनसहकंकपत्रविष्टिनातं जघान।

शतधन्वः—हावत्सशांतहृदयत्वांवीक्ष्यविस्मृतमृतसुतदुःखोऽहं त्वच्चरितं किंवदामि। प्रतिदिनंममपूजार्थपुष्पाण्यानीय समर्पणं अद्यापिनविस्मर्यते। रेरो दुष्टबुद्धे त्वंतस्यपुष्पसेनस्यवधूशतं बाळावतीमपिहत्वामयापालितमेनंतस्यसूनुंहंतुंकथंनलज्जितोसि वत्सत्वन्मुखंदुर्लभंमे।

मुनिः—अलमनेनदुःखेन।

प्रिया—हावत्सशांतहृदयक्कगतोऽसि देहिमेप्रतिवचनं। इतिपतति

शतधन्वः—प्रियेऽधुनापुष्पसेनोभार्याभिःपुत्रेणसह सुखमास्ते! वयमप्यग्निप्रवेशेनतमेवगच्छाम।

मुनिः—दुखिनंत्वांद्रष्टुंनशक्नोमि। आत्मगतं। किंतुमृतंत्वांद्रष्टुंशक्नोमि (नेपथ्ये।) रेरेदुष्टबुद्ध्यादिसेनाप्रभतयो भवत्प्रभुर्दुष्टबुद्धिर्यमपुरंगतः तथाहि।

दुष्टबुद्धितनयोनदृश्यते।
तंपितुर्मुखमुदीक्ष्यनंदितुं॥
प्रेषयामिकिमुपत्तनेपुरो।
योऽबलाशतमिमांपतेर्मुखं॥ १७॥

तामसः—श्रुत्वा। (आत्मगतं।) मत्तस्तंमामापिहानिष्यति। इतोपलायिष्येतावत्। प्रकाशं। मुनेत्वन्मरणादिकंनसहे अतोगच्छामीतिनिष्क्रांतः।

नेपथ्ये। रेरेतामसअलमलंधावनेन।

मुनिः—श्रुत्वा। शांतहृदयेनाकारितंस्यात्। आकाशे। गीयते।

योदुष्टःप्रतिकर्मणानृपवधूं प्राप्तंहिराज्यंपदं।
विस्मृत्याशुवधूशतंनिहितवान् भीमेवनेगर्भिणीं॥
हत्वाबालवतीयमाशुहननं कर्तुंहियातः किल।
दग्धस्तेनसभार्यएषसुचिरंस्वस्था स्मदुःखापदा॥ १८॥

मुनिः—प्रियेवत्सः किलायातः। प्रियाकुतोऽद्यापिवत्सः।

शिष्यः—नेपथ्याभिमुखमवलोक्य । सत्यमायातः ।

ततःप्रविशतिशांतहृदयः ।

मुनिः—शांतहृदयमवलोक्यप्रियेसत्यमायातः । वत्सएहि ।

शांतहृदयः—गुरोभवंतंमुनिवेषधारिणातामसेन वंचितंज्ञात्वाशीघ्रमागतोऽस्मि ।

मुनिः—कासौदुरात्माताममहतकः । ययामे तपोविभूत्या दग्धंकुर्या

शांतहृदयः—सतुतज्जनकं हत्वाआगच्छंतंमांविलोक्यपलायितः ।

मुनिः—भवतुभोजनायगच्छामग्रहं ।

शांतहृदयः—आकाशवाण्याऽहंबाळावतीपुत्रइति ज्ञातः । तांद्रष्टुमिच्छामि

प्रिया—वत्सअतीचिरंक्षुधितोऽसिभोजनायचर ।

शांतहृदयः—तथेतितैःसहनिष्क्रांतः । इतिनिष्क्रांताः सर्वे ।

इति पंचमोऽकः ।



अथ षष्ठमांकः ।



ततः प्रविशतिशांतहृदयःशिष्यश्च ।

शांतहृदयः——मित्रतेप्रजावतीशालस्तामसोऽत्यंतंपीडयाते इतिश्रुतवानास्मि ।

शिष्यः——तांपीडयतुत्वंकिंकरोषि ।

शांतहृदयः——मैवंवद । सदुष्टस्त्वांहत्वात्वत्पतिंचहत्वाराज्यमद्यापि भुंक्ते इतिब्रवीति अतःशीघ्रंतमेवहत्वातत्पीडयामुक्तांपत्नींस्वांकमारोप्यराज्यंभुक्षे ।

शिष्यः——एकवारंगच्छंतंत्वांमृतामितितामसमुखेनश्रुत्वासंतप्तोगुरुः । अधुनापित्तःपुरंनगच्छेत्यादिशति ।

शांतहृदयः——एंशांतहृदयोऽयतामसपीडितांपत्नींश्रुत्वातंहत्वात्वातुंगंतुकामोऽहंतमेवानुगच्छामीति कथयित्वाऽगच्छ ।

शिष्यः——भ्रातस्सएषतामसोऽत्यंतक्रूरोनिर्दयश्चभासते । पश्य ।

निर्दयश्चसमदृश्यतेसखे ।
तामसस्तवमदांदहच्चयत् ॥
दुष्टबुद्धितनयोऽयमुच्यते ।
तच्चतातगुणमेतिपुत्रकः ॥ १ ॥

शांतहृदयः——तच्चशीघ्रंगच्छावइतिनिष्क्रांतौ ।

ततःप्रविशतिकमलातामसश्च ।

तामसः——त्वत्पतिस्तातंमेहत्वामामपिहंतुकामः ।

कमला——सत्वांकिमर्थंहानिष्यति यदिशरणंगतश्चेन्मत्पतिः ।

तामसः——किंमहंशरणंगच्छामि ।

कमला——यदित्वंप्रतिकुलश्चेत्वांहत्वाराज्यं करोति ।

तामसः——शृणुतावत् ।

सरभसभुजदर्पयोद्धुकामः समकृततातवधापराधमेनं ॥
सपदियमपुरंप्रसह्यनीत्वा तवनयनांबुपिबंतमेवविद्धि ॥ २ ॥

अपिच । त्वद्येहेशंतातमुखंदृष्टवंतंकरोमि ।

कमला——नमेदेहेशोजीवितेशइतिवद ।

योहरत्यलंजन्मनासह जीवमेवमेकालपत्तनं ॥
गम्यतेऽपिनोस्थीयतेकथं तेनकृष्यतेमुख्यवायुना ॥ ३ ॥

तस्माज्जीवितेशशब्दोमयिजागर्तीतिविद्धि ।

तामसः—तेनकृष्यतेमुख्यवायुवनेतियदुक्तंतत्सत्यं । यदास्वंविधिवास्या स्तदामुख्यप्राणेनविधवामिलंयुक्तमेव । तथाहि ।

ज्ञेयंमत्तांसभयहृदंस्वांवेणीहीनां विरहितभर्त्रीं ॥
कर्षन्कश्चित्धृतयविकारो मुख्यप्राणः सरभसमेति ॥ ४ ॥

कमला—मैवंवद । समेनाथोऽचिरमेवस्वांहत्वाराज्यंकरोति ।

तामसः—अहमेकोपित्वांसभर्तृकीं हत्वा यमराज्याधीश्वरतांप्राप्स्यामि तमेवमृगयिष्ये । इतिनिष्क्रांतः ।

कमला—सर्चितंनिश्चस्य किंकर्तव्यमधुना ।

ततः प्रविशत्यश्वारूढःशांतहृदयःशिष्यश्च ।

शिष्यः—किमियंतेसखी ।

शांतहृदयः—अथकिं ।

कमला—विजयतामार्यपुत्रः । इत्यधोक्ते बाष्पपूर्णनयनातिष्ठति ।

शांतहृदयः—किमिदंकस्माद्भयं ।

कमला—तामसाद्भयंत्वांस्वत्पतिंच हनिष्यामीतिवदति ।

शांतहृदयः—अलंतद्भयेन ।

शिष्यः—सखेपश्य ।

नासिकामधिसुमौक्तिकलापो दृश्यतेवहतिचंद्रसुलीलां ॥
स्त्रीमुखाब्धिजननोद्यधरोष्ठे वर्ततेकिलसुधेतिसुधांशुः ॥ ५ ॥

त्वंमौक्तिककलापंदृष्ट्वाएवंभूतः । अहंतुसोमंतिनीमवलोक्यविस्मितः । पश्य ।

दृष्ट्वाभूषणशोभितांह्रदिजनाः शंकागताऽस्तंशशी ।
नोहुर्मूध्निममांगनां शशितनूरूपंसुवर्णांकितं ॥
तस्याधोऽर्धशशांकमूर्तिसदृशं हस्त्याननस्याधुना ।
शापदेवविनष्टकांतिरितितंन्यस्याभितोधंतमः ॥ ६ ॥

शिष्यः—शांतहृदयतेभार्यायाःकर्णविवरमार्गेण तामसवाक्यानिसत्यपि भूषणे कथंप्रविशेयुः ।

शांतहृदयः——अहमप्येतद्विचिंत्यचिंतयाग्र स्रोस्मि । तथाहि ।

कर्णभूषणयुगंकथंनुतत्तामसोक्तवचनानिसहेत ॥

अथवा ।

दुष्टसंगपरिहर्तुमत्यजद्भ्यतांहृदमितीवभातिमे ॥ ७ ॥

शिष्यः——तामसत्वंमातापितरौनस्मर अहमपिनस्मरामिमयासहसांधिंसाचिवपदेस्थितः सन्कुरुवृथाद्वेषणाकिं ।

कमला——ससंधिंनकरोति युष्मत्प्रार्थनयाकदाचित्करोतिचेन्मयिकिमप्यत्याहितमाचरति । अहंगमिष्ये । इतिकिंचिद्गत्वा ।

जल्पन्मुंचरुषंमायिस्थिरतरां कोवाऽपराधःकृतो त्यक्त्वामांकनुगच्छसीतिनमयागच्छस्व चैलांचलं । गृण्हन्तिष्ठप्रसीदमानिनिकटिं बध्नातिगच्छेतिमा ।

शिष्यः——

कांतःकिंनवयौवनेनहि । क्वणत्कांचीकलापोमम ॥ ८ ॥

शांतहृदयः——शिष्यजानासिकिंवक्तुंचतुरामिमां । ममतुएवंभासते । पश्य ।

दुष्टबुद्धितनयाचतुरेयं वक्तुमेवममचित्तजशांता ॥

दुष्टबुद्धितनयाचतुरेव वक्तुमेवममचित्तजशांता ॥ ९ ॥

कःकोऽत्रभोः । प्रविश्यदौवारिकः ।

दौवारिकः——जयतु २ महाराजः ।

शांतहृदयः——भोभोःसैनिकमाह्वय ।

दौवारिकः——तथेतिनिष्क्रांतः ।

ततःप्रविशतिसैनिकः ।

सैनिकः——जयतु २ महाराजः ।

शांतहृदयः——सैनिकतामसस्यैवंकथय । शृणु ।

तामसाद्यसंधिमेहिसर्वसौख्यदायिने ।

विस्मरेतिमातृतातनाशखेदमेवते ॥

तेनसार्धमंबुजाक्षशांतकायशर्मणा ।

स्थापितायक्षेममस्तुमंक्रिणःपदेसदा ॥ १० ॥

शिष्यः——अहमेवगच्छामिसंधिंकर्तुं । कदाचिदेनंदृष्ट्वारुषातामसः सैनिकास्मद्वास्त्रजघान्यांतिष्ठन्नपितद्वेषिणः पक्षपातेनसंधिंकर्तुमागतोऽसिकिमितिप्रहारंकुर्यात्।

शांतहृदयः—भवःवेननसहगच्छ ।

शिष्यः—तथेतिसैनिकेनसहनिष्कांतः ।

कमला—कदापिसंधिनकरोतिकिंतु उभावप्येकदाहानिष्यति ।

शांतहृदयः—तर्हिगच्छामवयंचरत्वं । इति अश्वस्कंधेउपवेश्य स्वयमप्युपविशति ।

शांतहृदयः—प्रियेसमंतात्तूर्णंसंतिशांतहृदयविजयस्वेति ।

कमला—सत्यं ।

ततःप्रविशंतिस्वसौधजालमार्गदृष्टयः पौरस्त्रियः ।

एका—एषहत्वातामसंएवमेवभार्ययास्थितमासने पश्यतुममनेत्रं ।

द्वितीया—जयतु २ शांतहृदयः ।

तृतीया—प्रत्यक्षेणब्रह्मणासंघटितंयुग्ममेतदवलोक्यधन्यास्मीतिवेद्मि ।

शांतहृदयः—एताःपश्य ।

करकमलयुगात्स्वतारकाभिः ।
सहकुसुमानिस्त्रियोनिपातयंति ॥
शुभकथनमनेनसूचयंत्यो ।
मयिममपुष्पनिपातनेनकांते ॥ ११ ॥

चतुर्था—सैहिंकेयग्रहणेनयःशशी क्षीणकांतिर्भवति तेनविनापिकथंतमःप्रादर्भूत् तद्योग्यं । स्वयशस्तुच्छीकृतचंद्रकांतेरम्यपुरस्तामससैंहिकेयग्रहणंविना तिष्ठतीति चित्रं । भवतुवयंगच्छामइतिमिथुनंविनानिष्कांताः ।

नेपथ्ये । हंतुमागतोऽयमावां ।

शांतहृदयः—नेपथ्याभिमुखमवलोक्य । अयेकःप्राप्तः ।

ततःप्रविशतःशिष्यसैनिकौ ।

शिष्यः—परित्रायतां २ शांतहृदयः ।

शांतहृदयः—कुलचित्त्वांसतामसोऽताडयत्किं ।

शिष्यः—अथकिं । ममदैवमेवएवंभूतं । पश्य ।

शीर्षेयस्यजटाःकदापि कुसुमैर्नालंकृतास्सिंचिता ।
स्तैलेनापिमुखे कठोरवचनान्यागंडयोस्ताडनं ॥
कर्णेह्युद्धरणंकरेणनयने कंठेऽपिसक्तःकरो ।
निर्गच्छेतिग्रहाद्गृहिश्चसलिलं दैवायतस्मैनमः ॥ १२ ॥

ततःप्रविशति तामसः ।

तामसः—साधु २ बाहुबलविनोदकालोयमेव ।

शांतहृदयः—शिष्यदुष्टोऽयमागतः । त्वमश्वारूढःसैनिकैसहगच्छ । तेप्रजावतीगृहंनयाप्रियेदेव्याशिष्येणसहगच्छ ।

कमला—नगच्छामिनाथंविना ।

शांतहृदयः—भवतुशिष्यतेनसहत्वमेवगच्छ ।

शिष्यः—तथेतिनिष्क्रांतः ।

तामसः—प्रहस्य । ररोडिंभक्षणमेवनभविष्यसि मद्बाहुबलाग्निनाशलभतां प्राप्ययमपुरंगच्छसि बाहुयुद्धायागच्छ ।

शांतहृदयः—सत्यंत्वमेववीरः अतएवनारीवतदामुनिवेषेणमांदृष्ट्वापलायितः। भवत्वित्युत्तिष्ठति ।

तामसः—सरोषं ।

हस्तेनहस्तोपरिदक्षिणेन संघट्टयिष्यन्निवतामसोऽलं ॥

एह्येहिदुष्टेतिस्ववाक्यतीक्ष्णादास्फोटघोषो ह्यधिकःपरीक्षन् ॥ १५ ॥

शांतहृदयः—मत्करोपिकुधेवत्वत्करइवशब्दंकुर्वन्वांहत्वात्रैव कमलामुपवेशयामीतिसूचयन्निवममोवोस्ताडनं करोतिपश्यपश्य ।

तामसः—

उत्क्षिप्यधूलिंकरकुड्मलेन पुनःपुनर्वक्त्रमभूच्चवक्रं ॥

स्वर्जावहर्ताइतएतिकिंनु भियैवकालंकिमुपश्यतीति ॥ १६

इतितथास्थितः ।

शांतहृदयः—

सदैवएतस्यमनोऽपिवक्रंवक्त्रंपुनः केवलमेवदेहं ॥

वक्रंनकुर्याकिमसूययेव कृत्वापुरोगर्जनसोदरोऽभूत् ॥ १७ ॥

इतितथास्थितः ।

उभौमिथःस्वेनकरेणहस्तं संपृश्यसंपृश्यललाटमेव ॥

धातुर्लिपिंतांशतमायुषः किंस्थिरांविधातुंस्पृशतस्विवर्नाव ॥ १८ ॥

कमला—

मन्मनोपिकथयत्यलंप्रिये स्पर्शनंकुरुललाटकेसुखं ॥

कुंकुमस्यसुकृतंकिमस्तिवा नेतिबोधइवमांकरेणते ॥ १९ ॥

इतिहस्तेनललाटंस्पृशति ।

सरभसमपकृष्यबाहुदंडंधृढतरालिंगितवामहस्तमध्यः ॥

जघनयुगलमध्यसक्तपाणिर्भुविपतनं कुरुतेस्मतंसनीचं ॥ २० ॥

तदनंतरमसौपरिपतनखेदमनुभवन्रक्तनयनसिंचितशांतहृदययुद्धसमयः समंततोविहंगमुद्वेरावमुखरितदिशोदशापिविलोकन् बहिरपिप्रकटितनिजगुणमहिमेवमध्यमगुणरजोधूसरितांगस्तामसोऽत्यंतरोषादिवमध्यमगुणसक्तनयनममध्यमगुणविशिष्टममध्यमगुणस्वभावं शांतहृदयमुपेत्यतत्कायस्थसत्वगुणंपरीक्षितुमिवभुजावुपगृह्य शतगुणंभ्रामयितापिबाल्याकृतडोलाविधिसंस्कारस्यमेऽयंसंस्कारएवजातइतिविचिंतयंतमिवस्थितंतंनीचकः पातयामास ।

कथितइवभुवासशांतकायः किमुपतनेनजहीतितिष्ठमत्तं ॥

नटइवबहुधोप्ततंतमेनं गलहतिपातितमस्तकंचचक्रे ॥ २१ ॥

शांतहृदयः—(सूर्यमवलोक्य ।)

तंदीपंजातांतमोहेतिहेळे बुध्वाहृष्ट्वास्वान्करान्छेदयेयं ॥

क्षीणोभूत्वाह्यंबरेतिष्ठसाध्वी हंतीत्येवंनैवत्वांक्षणकांतिं ॥ २२ ॥

कमला—नार्यतेवचनंमन्यते ।

शांतहृदयः—किंचित्क्षीणोभूत्वाऽऽकाशेतिष्ठति । रविः । वयंचाश्रमंगच्छामः । नेपथ्ये ।

एबीसीडिक्राप्स्गुड्झड्झेडतान् ।

शब्दान्जल्पन्राजद्वारंगतःसन् ॥

शष्पैस्तुल्यान्भृत्यकान्भीषयन्स ।

ह्यंतर्वत्नींप्राप्यमांमोदतेऽलं ॥ २३ ॥

शांतहृदयः—आकर्ण्य । प्रियेकविरिवायंभाति । तंसंभावयावइति-निष्क्रांतौ ।

ततःप्रविशतिशिष्यः ।

शिष्यः—इतस्ततः परिक्रामन् । किंकरोमि । अहंतुमहादुर्दैवी । करावलोक्य ।

करौयुवाभ्यांजलपूरितौघटौ धृतावुरोजाख्यघटौनयोषितां ॥
अथवा ।
विचिंत्यभाविश्रममब्जयोनिनारुषैवसृष्टेर्लिखितं कदापिन ॥ २४ ॥
आहेतिचकायरूपमार्तीहंसकारीमळत् ॥
मारेतस्यामघर्मानेभीतोऽहंसकरोमला ॥ २५ ॥
पांडित्यतातःफणिभर्तृशायी बलानुजोभक्तिविहीनशत्रुः ॥
मेशः सदापास्वधमाधमंमां प्रवर्गदेहस्त्वपवर्गदोऽयं ॥ २६ ॥
चैलानिधौतानिसहश्रशोमे स्त्रीणांमनोहारिसुलोचनानां ॥
आछादनीयंनकदापितेन कामार्द्रवस्त्रेणमयानुधौतं ॥ २७ ॥
तेधाविभज्यविधिनाकुचकुंभयुग्मे ।
बिंबोष्ठकेहरिपदेचसुधाहिसक्ता ॥
पीत्वाजनास्त्रिदशतामुपयांतियांतु ।
सादुर्लभायदिजनस्यविनाशकास्य ॥ २८ ॥
धातनियोषित्कुचकुंभयुग्मदुर्गाणिस्वच्छानिमयांबराणि ॥
कृत्वापिधौतंनविनीलतुंडमाच्छाद्ययुग्मं ग्रहणेप्यसंगात् ॥ २९ ॥
रेजिह्वेसकृदप्यखंडमधुरंरम्यंप्रियायामुखं ।
देवानामपिदुर्लभं किमपिबस्त्वांधिक्च जिव्हेतव ॥
मन्येनाममृषेतिसत्यमधुनाजिव्हारसज्ञासदा ।
संपातुंजलमेवयाचसिपुनर्दैन्यानुपूर्वाहितत् ॥ ३० ॥
ममतायदिनस्सृजतेमयि तांमधुसूदनभक्तमिमंपदवीं ॥
सुकुचग्रहणंनरकाधिपतिं पुरुषोत्तमभोकुरुमांनयमां ॥ ३१ ॥

ततः प्रविशतिशतधन्वमुनिः ।

मुनिः—रेशिष्यशांतहृदयःक्व ।

शिष्यः—सतुतामसंहत्वापत्नीसहितोगोदावरीतटिन्यांक्रीडितुमारब्धः ।

तथाहि ।

मर्त्योपकारार्थमलंपयोधरे वर्षत्ययंमज्जतिलोकसंघकः ॥
किंतुप्रियेवक्षसिरूढमूलके सिक्तंनमेपादरजोऽपिहंतते ॥ ३१ ॥

एवंनिरंतरंनिरंतरस्वकीयाधरवर्तिमधुसंसर्गतयेवकृतमधुवसतिं तांप्रियतमस्य वाणीमाकर्ण्यकरपादविशोधनार्थं करकमलेनजलमाहरंतींसाध्वींविलोक्य तन्व्या-

मुखकमलेगंडूषजलमुत्क्षिप्यपुनः पुनः स्वमुखंजलेनपूरयंतमेनमवलोक्यायिकांत-स्वदीयमुखं लोपशब्दमात्पुंमदीयवर्गस्थवर्णएवहेतुरितिविचिंत्यात्यंतशोकादिव द्वितीयलवर्णे लुप्ते सत्यपिजलवाहकंकथंभवतीतिशं कांपरिहरेत्युक्तः शांतहृदयःप्रिये लोकेजलजंहिजलंविनानोपजीवति प्रसिद्धंकिंतुत्वदीयलपनजलजंजलविरुद्धंकथ-माचरतीतिमदीयशंकां परिहरेतिवचनेनलज्जावनतमुखींप्रियांआकृष्य प्रियेऽत्र मज्जामिबुद्बुदमुपरिपश्येतितन्निमेषेणमज्जनं कृत्वाप्रियाजघनयुगलंहस्तेनगृण्हंत-मेनमज्ञात्वाहेशठमकरमदीयोरुग्रहणं नयुक्तमितिवचनमाकर्ण्यलुप्ताद्याक्षरमकरेण त्वदीयजघनग्रहंयुक्तमेवकिंतु कदलीस्तंभोजलेनिमग्नः किमुनजानेइति वचनेन सहोत्तिष्ठन् मयिसभायांरथेवापाथिवादेशांतरेवातिष्ठतिसत्यपिमदीयप्राणान् तव वक्षस्थमिदंकंदुकयुगंसदाहरतीत्यतोएनमुत्क्षिपाम्यंबरमुपैत्वित्यसूययेवप्रियां कंठसी-न्निदृढतरमालिंगनंबाहुयुगेलनकुर्वन्नर्जुनःसुभद्रयेवशतमन्युः शच्येवाजराजोइंदु-मत्येवतयाकमलयासह चिरतरंचक्रीडे ।

मुनिः—भवतुतेनसहागच्छ ।

शिष्यः—अपिच ।

अंसहितंमेत्वंशुकमेनं ॥
स्थापयभूम्यांसाप्रियमाह ॥ ३१ ॥
हरतिवसनंशशिवदनायाः ॥
पततिनयनंकलशयुगेते ॥ ३२ ॥

गुरुः—श्रुत्वासस्मितं । निष्क्रांतः ।

ततःप्रविशातिसकमलः शांतहृदयः ।

कमला—

कृष्णोऽयंमणिरित्यलंकथितवान्कृष्णंतुसप्रीणयन् ।
कृष्णेनापिप्रशंसितोननुभवान्राजाधिराजेत्यलं ॥
दत्तंयेनभयंरुषायदित्वयामह्यंनदत्तःकरो ।
नेत्रोत्पाटनपूर्वमेवनितरांहन्मीतिकृष्णायच ॥ ३३ ॥
कृष्णादप्यतिगर्वपूर्वकमिमंभीतात्करंचाहरन् ।
कृष्णस्यैवमुदःपितापिनितरांकृष्णेतुनप्रांगकः ॥
त्यत्कामांगमनंत्वयायदिकृतंहेकृष्णहन्मीत्यल ।
मायाच्छेतिवदन्सकौटकवरोवर्तेतहेकांतकः ॥ ३४ ॥

शांतहृदयः—

येननष्टरदनाहिनाप्रियेदंशितेति यमपत्तनंगता ॥
कालवन्हिविषयुक्तदंतकैर्दीशितापि चिरजीवितासकः ॥ ३५ ॥

कमला—

अत्तिकानुग्रहेणैवपुंसःप्राप्तांहिसंततिं ॥
रमायाःपूर्वपुण्यस्य व्ययलब्धामापिस्थिरां ॥ ३६ ॥

शांतहृदयः—

चतुर्मुखोनब्रह्मापिकृष्णोपिनाहिकेशवः ॥
राजापिसैन्यसंयुक्तोनाहिराजाप्रियेसकः ॥ ३७ ॥

कमला—

दुष्यंतराजस्यमनोरमाकाकाकस्तुपिंडं कुरुतेकिमेते ॥
स्तुत्यंतिदेवंकमथेतिलोकाः शकुंतलालिंगतिरामचंद्रं ॥ ३८ ॥

शिष्यः—समीपमागत्य । जयतु२ महाराजः ।

शांतहृदयः—सप्रेममयाजिताराजानः ।

शिष्यः—किंत्वयासर्वेजिताः ।

शांतहृदयः—अथ किं ।

शिष्यः—अद्यापिद्वौनजितौ । तथाहि ।

प्रसिद्धौसंग्राजौविगतमरणावाहृतकरौ ।
कराद्यैर्हीनौतौजगतिसकलादाहृतकरौ ॥
विजेतुंभीष्माद्यैरपहृतकराद्यावपिसदा ।
गतावूर्ध्वस्थायांप्रहरणपरायांजनममुं ॥ ३९ ॥
समंतादत्यंतंमृदुकुसुमदुर्गेणशिशुना ।
प्यलंशक्येनाशु नहिजगतिबालेतरजनैः ॥
सुभंक्तुंकूपेनावृतसकलदेहौतमधुना ।
पुरोऽस्मद्देशस्यायतजलधितुल्येनसहितौ ॥ ४० ॥
नगर्यामेकस्यामसितवदनौपर्वततनू ।
यमाद्विष्ण्वादिभ्योप्यचलयशसौपूर्वमधुना ॥
नशक्यौतौजेतुंनृपजयजयेत्युक्तनृपतिः ।
पुरीभुक्तासेयंस्मितलपनगर्भोऽजनितदा ॥ ४१ ॥

अतश्चरगृहंगच्छावइतिताभ्यांसहानिष्क्रांतः ।

ततःप्रविशतिशेषः ।

शेषः—सकोभवेत्यः कोपिस्वास्त्रेणद्विजिव्हानपिविगतजिव्हान्कृत्वा मच्छ्रुतिविषयतांप्राप्तः । भवतुतमेवमारयामीतिनिष्क्रांतः ।

ततः प्रविशतिशतधन्वमुनिः शिष्यश्च ।

मुनिः—वत्सः किंकर्तुकामोभवेत् ।

शिष्यः—भवान्तेनसहवनंगत्वाहतसेनापतिंमातृवर्गंयदाचापश्यः तदामातरंदुष्टबुद्धिनाहतामितिनिशम्यबहुधाविलप्यैनां जीवयामीतिभवंतमेवावादीत्सः ।

मुनिः—सत्यंततस्ततः ततोवत्सशेषादमृतमाहृत्यैतस्यांसिंचतिचेज्जीवतीतिकथयित्वायदानिर्गतोऽसि तदास्वास्त्रेणपातालस्थवाताशनान्खंडयन्शेषंभुवं प्रापितवान् ।

मुनिः—ततस्ततः ।

शिष्यः—ततःशेषःस्वशीर्षस्थमणिनाशितांधकारोयुद्धायोद्युक्तः ।

मुनिः—ततस्ततः ।

शिष्यः—ततः परस्परंशांतहृदयशेषयोः युद्धेप्रवृत्तेसति । तथाहि ।

पयोधराभ्यांगतवायुरेवनृपस्सभूमौपतर्तातिसूर्यः ॥
मत्वापितंनैवतिरोहितांगः स्थितोबरेहंतिभयादयंमां ॥ ४२ ॥

मुनिः—ततस्ततः ।

शिष्यः—ततः सक्ष्वेलंप्रलयकठोरेसंग्रामेमर्द्धिबभेदिनः कियंतइतिद्रष्टुकाम इवकर्मसाक्षीप्रादुर्बभूव । ततोनृपशरोप्ययंनःप्रभुशिरस्ताड्यतेरविपादैरिति रोषादिवतत्पादान्चिच्छेद । अन्यथासरविःपश्चात्तापमुपगतः सन्रक्तांगःपयोनिधौकिमर्थमपतत् ।

मुनिः—ततस्ततः ।

शिष्यः—ततःशेषः शांतहृदयपराजितोऽस्मित्वन्माताजीवितुममृतमानीय तुभ्यंददाम्यतोऽस्त्रमुपसंहरेतिकथयित्वास्वलोकमेत्यामृतमानीयादात् ।

मुनिः—ततस्ततः ।

शिष्यः—ततःशांतहृदयोऽमृतमादायग्रहमगतोभवेत् अतोवयमपिगच्छाम इतिनिष्क्रांतौ ॥ इतिनिष्क्रांताः सर्वे ॥

इति षष्ठोंकः ॥

अथ सप्तमोंकः ।



ततः प्रविशतिशांतहृदयः शतधन्वमुनिश्च ।

शांतहृदयः—तातमज्जननींजीवितुंकिंवस्तुन्यूनंभवेत् ।

मुनिः—संजीवननामकावनस्पतिः ।

शांतहृदयः—आनयामिकुत्रवर्तते ।

मुनिः—सादुर्लभा ।

शांतहृदयः—कुत्रवर्ततेकथयतुतातः । तथाहि । किंभूतलेनैववनस्पतिःसा ।

मुनिः—नैवतिष्ठति ।

शांतहृदयः—किं स्वर्गकेतात ।

मुनिः—नवत्सतत्र ।

शांतहृदयः—पातालेलोकेपिनतत्रसाकिं ।

मुनिः—

सिंधूनतिक्रम्यगतेतिविद्धि ॥ १ ॥

शांतहृदयः—तर्हिसप्तापिसिंधूनुलंघ्यतांवनस्पतिमानयामि । आज्ञापयतुतातः ।

मुनिः—केनमार्गेणगच्छसि ।

शांतहृदयः—दक्षिणेन ।

मुनिः—ससंभ्रमं । माकुरुतेनपथागमनं ।

शांतहृदयः—किमर्थं ।

मुनिः—तत्रमूषकपतनव्याधिर्वर्तते । तथाहितत्रस्थजनैः ।

भवनंभकाररहितंक्रियतेभवपुत्रवाहनैः पतनं ॥
कृत्वावनंभसहितंललनाकरभोजनायभूपैश्च ॥ २ ॥

अपिच ।

अहमतिकठिनोऽहमेवपूर्वंचिरतरमाजिजितः पलायितोऽपि ॥
वनमिवकुचकुंभभीतिभारात्क्षणमपिविश्रमितुंभकारयोधः ॥ ३ ॥

सपदितमनुधाविनंविलोक्यपितृवनगेहपदारविंदमागात् ॥
अवहदितितमाहशंकरश्चभवइतिनामयथार्थमस्यचासीत् ॥ ४ ॥
अलमलमतिसाहसेनपीडांमवनभकारभटायदेहिमामा ॥
इतिमववचसाहसंतमाहविवदतिव्यर्थमसौभकारयोधः ॥ ५ ॥

शांतहृदयः—शातंतेनअलं । मार्गेणकेनगच्छाम ।
मुनिः—उत्तरेण । गत्वापिसमुद्रोलंघनंकथंक्रियते ।
शांतहृदयः—कथमपिगच्छाम्याज्ञपयतु ।
मुनिः—गच्छ ।
शांतहृदयः—किंचिद्गत्वा । हंसयुगंदृष्ट्वासविस्मयं ।

मातर्मातः क्वचिदपिस्वयानैवनी तौहिआवां ।
वृक्षस्कंधेनिहितसदनौहंतिसिंहःकृतांतः ॥
भूपोमूढोनभजतिकृपांशीघ्रमागच्छमातः ।
कौशंतौवांसपादिपृथुकौधावयामासचित्तं ॥ ६ ॥

सिंहहंति । तदनुनृपकृतात्मकृतांतवधौहंसौसंतुष्टमनसाराजेंद्रकृपार्द्रचेतसा त्वयारक्षितयोरावयोः शतवर्षपर्यंतंजीवितंजातमतोऽऽकल्पपालिताभूर्वत्विवचनमकण्यागतावपिमातरपितरौनपृच्छंतावलोक्य डिंभकौमदीयदुग्धंपिबतमितिवचनमाकर्ण्यापिमातर्नपिबावस्त्वदीयदुग्धंयावत्तस्यमनोरथोनसाध्यते तावदितिधाण्यानृपसमीपमागत्यभूपत्वन्मनसिकिंवर्ततेकंवामनोरथंसाधयावइतिताभ्यांदंपतीभ्यां प्रबोधितोनृपतिः संजवनवनस्पतिः कीरसमुद्रेवर्ततेसैवसाध्यते समुद्रोलंघनार्थंयुवयोः सहायः प्रार्थ्यतइतिउत्काविमानीकृतराजहंसदंपतिरसौविमानीकृतराजहंसश्चतुर्मुखस्सत्यलोकं संत्यज्यदैत्यभयात्समुद्रशायिनंनारायणं स्तोतुंसवेगंगच्छतीववनदेवतैरुच्चार्यमाणः तूर्णमेवसत्पापिसमुद्रानुलंघ्यकीरसमुद्रस्थांवनस्पतिमुपेत्यआदायपुनरपि निवर्त्यतथाभूतएवसयुद्रतटमनुपपात ।

उत्सृष्टहंसयुगलश्चनृपः सशीघ्रंप्रम्णातयो स्तरुतलेन सहैवधावन् ॥
आगत्यमातरमयंहतकामपि द्राक्तस्थौ पुरोवनमृषेर्निहितौषधिः सन् ॥७॥

मुनिः—सविस्मयं । वत्सकथंप्राप्ता ईयंवनस्पतिः ।
शांतहृदयः—भवतामनुग्रहात्सर्वं करतलगतमेव !
मुनिः—सहर्षं । वत्सास्थीन्यानय ।

शांतहृदयः—मातुरस्थीन्यानयति । वत्सस्वप्नान्निवर्तमानेवैनामुत्थापयामि । इति अमृतसेचनं कृत्वासंजीविन्योत्थापयति ।

बाळावती—उत्थाय । हावत्सकुत्रातिष्ठासि ।

शांतहृदयः—पादयोः प्रणम्य ।

कमठजननंमातुर्मातोविशीर्षठकारहृत् ।
प्रभवतिपुनर्जीवायैवममापिपितुस्स्तव ॥
पितरमधुनादुर्बुद्धिस्त्वांयथानिजघानहि ।
विगतशिरसायातस्सोऽपितथानमतीत्यसौ ॥ ८ ॥

तदनंतरं ।

बाळावती—वत्सतेनहतंसेनापतिमादौजीवय ।

शांतहृदयः—तथेतिजीवयति ।

सेनापतिः—सप्रेम । नत्वा आयुष्मन्रथमादायागच्छामि ।

बाळावती—वत्समुनेराश्रमंगच्छामः ।

शांतहृदयः—किमर्थंतत् । स्वनगरंगच्छामः । सेनापतेरथमानय । सेनापतिस्तथेतिनिष्क्रांतः ।

मुनिः—वत्सकिंमात्रासहाधुना स्वनगरंगच्छामः किंनीलपुरं ।

शांतहृदयः—कथंमन्यतेभवान् ।

मुनिः—नीलपुरंगच्छामःकार्यगौरवात् ।

शांतहृदयः—तथेतिमुनिनामात्रासहानिष्क्रांतः ।

ततःप्रविशतिसभार्योनीलसेनः ।

नीलसेनः—प्रियेसुष्ठुजातं । वत्सस्यशांतहृदयस्यपट्टाभिषेकोभविष्यतीति । किंतुशतधन्वमुनेरागमनेनाश्रमः पूतः । तदनुग्रहेणैववत्सस्यसर्वंकुशलमेव । तेनदुष्टबुद्धिनाहतामपिमातरमजीवयत् अधुनासएवपितरंजीवयतीतिसेनापतिमुखेन श्रुत्वा तदस्थीनितत्रवर्ततेइतिकथयित्वाऽहमागतोऽस्मि ।

प्रिया—सजीवितोभवेत् मुनिप्रभावात् । किंतुएतादृशएवपुत्रः नान्यः । तथाहि ।

एकेनापिगुणेनैवयस्यस्तोत्रंनजायते ॥
तेनाजन्मनातस्यमातुर्दुःखैकहेतुना ॥ ९ ॥

नीलसेनः—अधुनाजीवयतिनवेतिसंशयः । ततःपटाक्षेपेणसेनापतिः प्रविश्य । पुत्रोऽजीवयत्तातंपुष्पसेनं ।

नीलः—तमीक्ष्य । एतत्कथं । ततस्ततः ।

सेनापतिः—सपुष्पसेनः पुत्रस्यपट्टाभिषेकार्थं गमनोन्मुखस्त्वामाह्वयति ।

नीलः—कुत्राभिषेकोभविष्यति ।

सेनापतिः—तत्रपुरि । तथाहि ।

यस्यांहिमांशुमबलाहिस्वसौधजाल- ।
मार्गात्समागतममुंजलधौक्षुधाऽऽदौ ॥
ज्ञात्वानिहत्यविटमेनमपातयन्स ।
ह्यद्यापिकल्यसमयेविपरीतवाहः ॥ १० ॥
यस्यांपरेद्युरपिसौधतलेसुधांशुं ।
नोऽताडयन् शठकुतो क्षणदागतंते ॥
हस्तैःप्रियाधरसुधामपहृत्ययासीत्युक्तो ।
गदांगभवचंद्रनरोऽधुनासः ॥ ११ ॥
यस्यांपयोधरकरंनभसीतिरोषा ।
लुप्तद्वितीयलिपिमाठरविद्धभानुं ॥
ज्ञात्वानियुज्यललनाभिरयंविमेघं ।
पाकेपयोधरकरोभववंचितोऽभूत् ॥ १२ ॥
यस्यांपयोधरवलिर्गत वायुमेव ।
यन्मांकरोतिशतमन्युरुषैवमुक्ताः ॥
आसांहिसौधतलमेत्यप्रणालिरुद्धाः ।
क्रोशंतएवनितरांरुरुदुश्चमेघाः ॥ १३ ॥
यस्यांहिवर्तुलसुगंधिभिरेवजेतु ।
माकाशपद्ममबलाननपद्ममेत्य ॥
संपातितंभुविजलेजितमंबुजंतत् ।
स्त्रीभिर्मुखैःस्वपदमाप्तुमलंनशक्तं ॥ १४ ॥
यस्यांनिशम्यललनावचनानिभीतो ।
भिंदंतिकुंभमितिकंठरवंजःकुलालः ॥

मानोःकरेषुनिहितानकरोत्समस्तान् ।
दाढ्यार्थमेवममचित्रमिदंहिभाति ॥ १५ ॥
तस्यांहिपुष्पवतिख्यातपुरीतिराजन् ।
पौत्रस्यतेशिरासिमंगलदुग्धधारां ॥
साध्वीयुतस्यऋषिसंघकरात्पतंतीं ।
राज्याधिरोहणमिदंभववीक्ष्यतुष्टः ॥ १६ ॥

प्रविश्य शिष्यः । तोषितोऽस्मि २। जयतु २ महाराजः

राजा—कस्मादागतोऽसि ।

शिष्यः—शतधन्वाश्रमात् । किंतुसर्वेराजानः पौष्पसेनाभिषेकमहोत्सव-दर्शनार्थंगताइतितोषितोऽस्मि ।

नीलः—अहमपितेनसहगत्वातस्याभिषेकं करोमि । सेनापतेशीघ्रमाग-च्छेति निष्क्रांतः ।

शिष्यः—सेनापतेऽद्याचित्रतरंकर्मदृष्टं ।

सेनापतिः—किंकिंदृष्टं ।

शिष्यः—यदाहंएतदाश्रमान्निर्गतः । तदाएकोऽऽह ॥

आमृत्योःपरदारदेहभवनंसाक्षाद्यमःकथ्यते ।
सूर्यीतर्गततताड्यतेऽयमुदधेर्जातेशनारायण ॥
पुत्रोगेहमुपैतुतेयदिमतिर्नास्तीतिपुत्रंस्वकं ।
तर्ह्येनंनितरांजहीतिजनयस्यास्वास्यमाजातुचित् ॥ १७ ॥

अपरा ।

मातुःसहोदरफलंघटतुल्यमीशः ।
पीनंममोरसिनिधायविनिर्गतोहि ॥
क्रीणासिचेत्कुरुकरंफलकेषुपक्वं ।
पक्वंनचेदमितिवेत्सियुवन्रजन्यां ॥ १८ ॥
थायेत्युरोजघटकोष्ठकराननेतौ ।
कृत्वाविलोमलिपिघर्मजलेनकांते ॥
अंगंत्वुरोजजघनादिप्रसिक्तमस्या ।
वक्षस्थमन्मथशिखीनतथाहिसिक्तः ॥ १९ ॥

कस्मात्त्वंललनांसुताडिततनूं कुर्वन्सदानिंद्यसे ।
सासूनेतनयनहीतिभुजयोर्न्यस्तांगकाऽहर्निशं ॥
आगोऽस्तीतिममापिनोकिमिहमांब्रूहीतिबालेऽपिवा ।
वृद्धेवातरुणेषुसक्तवपुषःपुत्रस्तुजातोनहि ॥ २० ॥
मुग्धेकिंनिहितंनिजोरसियुवन्नेदंसुपक्वंफलं ।
किंरक्तंनहिचंदनंकिमुशरोमारस्यनोतत्फलं ॥
तन्मूल्यंसुभगेकियद्वदत्रुतंक्रीणासिचेत्स्पर्शय ।
चक्षुर्भूतममैल्यवस्तुददतोरात्रौनतेन्यत्क्रयं ॥ २१ ॥
अर्काल्किंसुभगेबिभेषि मिथुनं नेद्यंसदाकर्मभिः ।
पुत्रत्वंनरकेनिपातयचिरंदूतैर्वदेदास्विति ॥
छिंद्यामर्कजमंबुजाक्षिनितरांचार्कप्रभातेयदि ।
तर्ह्यागत्यममांतगेहमधुनालिंगस्वमांवक्षसि ॥ २२ ॥
अहरादितिमयाहठाद्गृहीतं ।
कुचयुगलंसखितेमनःकराभ्यां ॥
वदममपथिकोऽपिमंतुरत्र ।
किमुसकलैर्भुविगृह्यतेनचोरः ॥ २३ ॥
बालेकिंभवनस्यमार्गविलुठल्लाक्षारसेनांकितौ
त्वत्पादावलोक्यतेनजतुनारक्तंमर्दायंमनः ॥
नेत्रंतेकिमितोह्यपोहिचरणेसक्तंमदीयेयुवन्
क्रोधव्यूहकुचाख्यकुंभयुगलाच्छेषोस्तिकोपः कियान् ॥२४॥
कस्मान्मूर्खमदीयहेमघटयोः सक्तंत्वदीयंमनो
नांतंसुंदरिवक्षसिस्थितमितिवस्तुद्वयंतेपुनः ॥
नाद्यंमित्रमितीवकर्षतिबलात्त्वत्थेमकुंभद्वयं
तर्ह्यागत्यममांतगेहमधुनालिंगस्वमांवक्षसि ॥ २५ ॥
व्यापारायपतिर्गतश्चविपतिः श्वश्रूः किलांधामम
वित्तंसद्मनिचास्तितस्करभयादाबद्धकंपोरसि ॥
रात्रौमांतरुणींस्वबाहुपतितांकृत्वामुहुःपीठयन्
स्थित्वातत्कृतकक्षमश्चभवनंयाहीतिकल्येयुवन् ॥ २६ ॥

सेनापतिः—जितेंद्रियस्यकिमनयावार्तया ॥

शिष्यः—तच्चकथयामि । तथाहि

ज्ञाताः साम्या ज्ञानन्मातुः ॥ सर्वामेशवामायेन ॥ २७ ॥

किंतु ।

णमेक्रेतिविलोमेनकृत्वाध्यायन्नरोहरेः ॥

अंगानिसर्वपापेभ्योमुक्तःसन्मोक्षमाप्नुयात् ॥ २८ ॥

सेनापतेएतदर्थनजाने । श्लोकमन्यंश्रुणु ।

तदर्थस्तुकथ्यतां । तथाहि ॥

कायोगियोगविघ्नाशीहतानांकोऽसतामरिः ।

भक्तार्तिहंताकोदेवस्त्वत्रैवोक्तंनबुद्ध्यते ॥ २९ ॥

(नेपथ्ये ।) भोभोवैदूर्यइंद्रनीलाद्यनेकभूपतिमुकुटगतमणिकिरणप्रभाशोभितजनः साध्वीयुत कुमारपौष्पसेनिराज्याधिरोहणकालेऽगतइतितत्पित्र्योश्चित्तस्यानदोऽभूत् । तच्छीघ्रमागच्छतांबंधुजनः ।

सनौपतिः—अये एषमहाराजः तत्समीपमेवगच्छावः इतिनिष्क्रांतौ । ततः-प्रविशत्यासनस्थस्सभार्यः सगुरुः कुमारः शांतहृदयः । पश्चात्सभार्यः पुष्पसेनः ।

गुरुः—किंतेपरंभूयःप्रियमुपकरोमि । तौपुनःप्रविशतः ।

सेनापतिः—उपसृत्य । जयतु २ महाराजः ।

शिष्यः—जयतु २ महाराजः ।

पुष्पसेनः—भवदनुग्रहात्सर्वमानंदमनुभवामि । किंतुप्रीतश्चेतर्हिदमस्तु

भरतवाक्यं । रेमेरामांमुरोरेरेऽऽरामारामोऽ-

मरेऽमरे ॥ रामारामोऽमरेमा रेरमेमरौमुरारिरि ॥ ३० ॥

हरिपदभजनेच्छुरंतरंगेपदयुगलेपदजावगाहनेच्छुः ॥

बहुनृपकरतुष्टपुत्रकःस्यामहमितिकाननगर्भगेहकश्च ॥ ३१ ॥

गुरुः—एवमस्तु । इतिनिष्क्रांताः सर्वे ॥

इतिसप्तमोंकः ॥

इंग्रेजीबिजपूरजैल्हचरणसक्तेंडितालूकक ।

मीमाभागिरथीपवित्रजनकनाग्राव्ळिजीवात्मजः ॥

कृत्वाग्रंथमिमंहरेश्चरणयोस्संस्थाप्यगोविंदक ।
स्तुष्टोयेनसुखंकटाक्षपतनाद्गोदावरीलंघिता ॥ १ ॥
इतिश्रीमत्कविकुलतिलकनागरहाळ्ळिकुलावतंसकश्रीमद-
त्रिगोत्रभू षण गुराचार्यसुतगोविंदपंडिता-
चार्यविरचितं श्रीमत्पुष्पसेनतनयराज्याधिरोहणं
नाम नाटकं भुन्यग्निवसुभूसंमितशालिवाहन-
शाकेमर्गशीषशुक्लद्वितीयायांमुद्रयित्वा.
संपूर्णतांप्रापितं ॥

॥ श्रीकृष्णार्पणमस्तु ॥

समाप्त.